This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह E

दाखल क्र. M-2637 विषय

नाव दुर्गासप्तशती-होमविधी

लेखक / लिपीकार —

पृठ 26 काळ पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

E

M-2637

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिबा जातवेदस इति दुर्गासूक्तेनोपस्थाय तर्पणं कुर्यात् स्नानवत्तीर्थमाकृष्य षट्दलं चक्रं विलिख्य मूलेन प्राणानायम्य न्यासादिकं विधाय षडंगं कु
र्यात् ॐ ह्रीं चंडिकायै हृदयाय नमः ॐ ह्रीं चंडिकायै शिरसे स्वाहा ॐ ह्रीं चंडिकायै शिखायै वषट् ॐ ह्रीं चंडिकायै नमः कवचाय हुं ॐ ह्रीं
चंडिकायै नमः नेत्रत्रयाय वौषट् ॐ ह्रीं चंडिकायै नमः अस्त्राय फट् इति षडंगानि विन्यस्य महिषमर्दिनीं ध्यात्वा नवबीजमंत्रान् आवाहनादि
मुद्राः प्रदर्श्य चंडिका तृप्यताम् इति गंधपुष्पसहितान् जलांजलीन् अष्टोत्तरशतं तदर्धं तदर्धं वा यथाशक्ति तर्पयेत् इति श्रीडामरादितंत्रसा
रे देवीमहोत्सवे स्नानसंध्याविधिर्नाम प्रथमावसरः अथ विध्युक्तमार्गेणांकुरार्पणं वास्तुबलिं विधाय चतुर्द्वारयुतं मंडपं पुष्पप्राकारसहि
तं दिव्य[illegible]धूपधूपितं नानावितानशोभितं बहुदीपाविराजितं कृत्वा तन्मध्ये वेदिकां यथाप्रमाणां कृत्वा देव्याः पुरतः हस्तमात्रं कुंडं मेखलासहितं
नवसूत्रेण वेष्टितं कुर्यात् अथ कर्तासपत्नीकास्तिलतैलेन मंगलस्नानं कृत्वा शुचिश्चित्रपट्टकूलवस्त्राभरणगंधपुष्पैरलंकृतः सन् गात्वा तस्मात् पुनर्वो
दकेन कलशं संपूर्य तत्र गंगादिनदीनां वाह्य संपूज्य तं कलशं गृहीत्वा दोलिकाप्रमुखवाद्यैः सह कानिक्रंदद्वानो भद्राभद्रं कर्णेभिः स्वस्ति न इंद्र इति
मंत्रघोषैर्गीतवाद्यनृत्योत्सवैश्च यागभूमिमागम्य मंडपं त्रिः प्रदक्षिणीकृत्य मंडपस्येशानभागे स्थित्वा सूर्याय नमः क्षेत्रपालाय नमः इत्यनेन कला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पा॰ चं टमुद्घाद्य प्रणम्य दक्षिणपादपुरःसरं पश्चिमद्वारेणांतः प्राविश्य आचम्य प्राणानायम्य संकल्प्य श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थं वि
2 जपपूजाहोमे निर्विघ्नतासिध्यर्थं तदादौ भूमिशुध्यर्थं श्रीमहागणपतिपूजां करिष्ये इति संकल्प्य तंडुलराशौ गणानां त्वेति आवाहनाद्युपचारान्सम
र्प्य कलशोदकमन्यपात्रेण गृहीत्वा आपोहिष्ठाशंनइंद्राग्नी इति मंत्रैरौदुंबरशमीदूर्वासहितेन भूमिं त्रिवारं प्रोक्षयेत् यदत्र संश्रितं भूतं स्थानमा
श्रित्य तिष्ठति स्थानं परित्यक्त्वा च तत्सर्वं यत्रस्थं तत्र गच्छतु भद्रं कर्णेभिः स्वस्तिनइंद्र इति मंत्रैरीशानमारभ्यासितसर्षपांश्च विकिरेत् सत्सानितुरिति
गोमूत्रं गंधद्वारामिति गोमयं आप्यायस्वेति क्षीरं दधिक्राव्ण इति दधि शुक्रमसीत्याज्यं देवस्यत्वेति कुशोदकं दिवि भूमं तरिक्षे च प्रोक्षयेत
मंडपे वेद्याः पुरतः संपूर्णकलशं तंडुलराशौ संस्थाप्य देशकालौ स्मृत्वा स्वस्ति वाचनं नांदीश्राद्धं मातृकापूजां च कुर्यात् अथ दैशिकादिवरणं
नवरात्रे नित्यचंडी नवदुर्गाकालरात्रिनवचंडीकर्मसु आचार्यर्त्विगेको ब्राह्मणो वरणीयः शतचंडीकर्मणि एकस्त्वाचार्यो निवार्त्विजः एवं दश
विप्रा वरणीयाः सहस्रचंड्यां शतब्राह्मणा वरणीयाः सर्वे निवाणविपासकाश्चंडीपाठसंपूर्णग्राह्याः द्वारजपार्थं अष्टौ ब्राह्मणा वरणीयाः — 2
सर्वत्र होमकाले ब्रह्मत्वगाणपत्यर्थं द्वौ ब्राह्मणौ वरणीयौ सर्वेषां मधुपर्कविधानेन पूजां कुर्यात् बृहस्पतिर्यथाचार्ये दिनानां यज्ञकर्मणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथात्वंभवयज्ञेस्मिन्नाचार्यस्त्वामहं वृणे मयाप्रारंभितेस्मिन् चंडीजपार्चनहोमकर्मणि आचार्यस्त्वं भव अथवा आचार्यत्वं भवंतः कुर्वन्तु
इतिसर्वत्र यथाचतुर्मुखो ब्रह्मावेदशास्त्रविशारदः तथात्वंभवयज्ञेस्मिन् ब्रह्माणं त्वामहं वृणे कार्येष्वपिचदेवानांगणेशः सिद्धिदोयथा-
तथात्वंभवयज्ञेस्मिन्गणेशं त्वामहं वृणे भवंतोस्मिन् क्रतौयूयमृत्विजोहमनुवृणे पावनाः सर्वदेवानां ब्राह्मणा ब्रह्मरूपिणः अनुगृण्हं
तुमामद्यप्रार्थयेदितितान्नमेत् सर्वेषांमधुपर्कविधानेनपूजांकुर्यात् चतुरस्त्रं हस्तमात्रं अष्टांगुलसमुच्छ्रयं श्रीपर्णीपीठमुपाविश्य सम
विंशतिदर्भग्रंथितं विष्टरः पाद्यार्थं ताम्रपात्राणि अर्घ्यार्थं शिरवाः आचमनार्थं ताम्रकमंडलूनि दिव्यवस्त्रताम्रभूषितपादुका इति ब्राह्मणेभ्यः
समर्पणीयाः एतद्द्विगुणितं आचार्यायदद्यात् तत आवाहितेकलशेपूर्वेगिणानांलोत्तिगणपतिं दक्षिणेजातवेदसइतिदुर्गां पश्चिमेक्षेत्र
स्यइतिक्षेत्रपालं उत्तरे आयंगौरीतिगौरीं मातृरावाह्यसंपूज्यपूजासंभाराणिसंपाद्यमंडपपूजांकुर्यात् इतिश्रीडामरादितंत्रसारे देवीमहो
त्सवेशालाप्रवेशोनाम द्वितीयो वसरः अथप्राणानायम्य संकल्प्य ब्राह्मणैः सहपूर्वद्वारोस्थितामंडपदेवताभ्यो बलीन् दद्यात् तद्य
था ॐ ह्रीं अयिकादंबरि गजारूढे वज्रहस्ते एह्येहि आगच्छागच्छ गंधपुष्पधूपदीपसहितं इमं क्षीरान्नबलिं गृहाण ममेप्सितं कुरु कुरु स्वाहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं. वि. द्वारपार्श्वे दक्षिणे दंडंकमंडलुं पश्चाद् दक्षसूत्रमथाभयं बिभर्ति कनकछाया ब्राह्मी कृष्णाजिनोज्वला १ ॐ ह्रीं अयि ब्राह्मि एह्येह्यागच्छागच्छ
२ गंधपुष्पधूपदीपसहितं इमं क्षीरान्नबलिं गृहाण ममेप्सितं कुरु कुरु स्वाहा रुद्रं कपरश्वधं चक्रं दुंदुभिं नृकरोटिकं वहंती हिमसंकाशां ध्येयं माहेश्व
री शुभा २ ॐ ह्रीं अयि माहेश्वरि एह्येह्यागच्छागच्छ गंधपुष्पधूपदीपसहितं इमं क्षीरान्नबलिं गृहाण ममेप्सितं कुरु कुरु स्वाहा ॐ
चिच्छक्त्यै नमः ॐ मायाशक्त्यै नमः धात्रे नमः विधात्रे नमः शंखनिधये नमः पद्मनिधये नमः ऊर्ध्वदेहल्यां श्रियै नमः अधोदेहल्यां वास्तुपु
रुषाय नमः इति पूर्वद्वारे देवता अभिवंद्य सुदृढं तोरणं पूर्वे न्यग्रोधं कांचनप्रभं रक्षार्थं चैव बध्नामि चंडीपूजाख्यकर्मणि अग्निमीळे इति तो
रणं बध्वा मही द्यौरिति भूमिं प्रार्थ्य आकलशेष्विति कलशमभिमंत्र्य इमं मे वरुण इति कलशद्वयं द्वारपार्श्वयोः संस्थाप्य इमं मे गंग इति जलमापूर्य या ओ
षधीरिति ओषधीः धान्यमसीति धान्यं सहिरत्नानीति रत्नं स्योना पृथिवीति मृत्तिका अश्वत्थे व इति पल्लवं तत्सवितुरिति गोमूत्रं गंधद्वारामि
ति गोमयं आप्यायस्वेति क्षीरं दधिक्राव्ण इति दधि शुक्रमसीत्याज्यं देवस्य त्वेति कुशोदकं इति कलशे निक्षिप्य युवं वस्त्राणीति वस्त्राभावेष्वस २
वस्त्रं सजलं गंधपुष्पपल्लवसंयुतं सरलं स्थापयाम्यद्य द्वारेस्मिन् कलशद्वयं तत्र ऋग्वेदमावाहयेत् ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदेवतः अत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोत्रसुविप्रेंद्र ऋ हि कुं सन्निधोभव अग्निमी ळ इति ऋग्वेदमावाहयामि कमीनिष्ठो तपोयुक्तो ब्राह्मणो वेदपारगो श्रीसूक्तस्यजपार्थंहि पूर्वेभिवतमृ
लिजौ धनुः प्रभां पताकांच सिंदूरारुणसध्वजां स्थापयामि महेंद्राय शचीयुक्ताय वज्रिणे आशुः शिशानः संक्रंदनेति ध्वजपताकां स्थापयेत् तत्र
ऐरावतमावाहयेत् वेदीमध्ये लांछितकमलेकर्णिका मध्यसंस्थः समहाकेसरि[?] वपुः सर्वस्वरज्जुर्दीर्घ बाहुः गोत्रेरम्ये बहुविधगुणः काश्यपारव्ये प्रसूतः
कालिंगारव्यविषयजानितः प्राङ्मुखः पद्महस्तः आकृष्णेनेति मंत्रेण अधिदेवताप्रत्यधिदेवतासहितसूर्य एह्येहि सादि पूर्वद्वार दक्षिणभागे प्राच्यां भृगु
भोजकटप्रजातः सभार्गवः पूर्वमुखासिताभिः सपंचकोणःसरथाधिरूढो दंडाक्षमालावरदांबुपात्रः २ शुक्रं ते अन्यदिति मंत्रेण अधिदेवताप्रत्यधि
देवतासहितशुक्र एह्येहि सादि पूर्वद्वारवामभागे यजेत् इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः शतयज्ञाधिदेवेशात्तस्मै नित्यं नमोनमः त्रातारमिंद्र-
मिति एह्येहि सादि पानपात्रंचरवड्ग च अक्षमालांकमंडलुं त्रिनेत्रंवरदं शांतं कुमारंचादिगंबरं ब्रह्माणीशक्तिसंयुक्तं हंसवाहनभूषितं श्वेतवर्णमहं
वंदे ह्यसितांगंचभैरवं ॐ ह्रीं अं असितांगभैरवएह्येहि आगच्छागच्छेति इति पूर्वद्वारे अथाग्नेयकोणे प्राणानायम्यसंकल्प ॐ ह्रीं ठंठं ल्के अजारूढे
शक्तिहस्ते एह्येहि सादि पताकामग्नयेरक्तां ध्वजं चैवाग्निसंनिभं स्वाहायुक्ताय देवाय स्थापयामि हविर्भुजे त्वं नो अग्न इति ध्वजपताकं स्थापयामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शा·चं·वि·
४

तत्रपुंडरीकं दिग्गजंदमकं लक्ष्मीगजभावाह्य आग्नेयभागेसरथोदशाभ्यश्चाग्नेयजोयामुनदेशजश्चप्रसडुरम स्थश्चतुरस्रपीठेगदाधरांकोहिमगुः-
सिताभः आप्यायस्वेति अधिदेवताप्रसधिदेवतासहितचंद्रएह्येहीत्यादि अनादिपुरुषोरक्तः सर्वदेवमयोहिसः धूमकेतुरनाधृष्यस्तस्मैनित्यंनमो
नमः शंनोअग्नइतिअग्निभावाह्य ॐ ह्रीं अंरं अग्नेएह्येहीत्यत्ति परश्वायुधमृत्वर्णस्वरूपात्रधरंतथा त्रिनेत्रंवरदंशांतंवंदेहंरुरुभैरवं ॐ ह्रीं
ऐंई माहेशांशक्तिसंयुक्तं वृषवाहनभूषितं शुध्दस्फटिकसंकाशंवंदेहंरुरुभैरवं ॐ ह्रीं ऐं ईं रुरुभैरवएह्येहीत्यादि इत्याग्नेये अथदक्षिणद्वारे
प्राणानायम्य संकल्प्य ॐ ह्रीं करालिके महिषारूढे दंडहस्ते एह्येहीत्यादि द्वारदक्षिणपार्श्वे अंकुशंदंडखड्गौ पाशांचदधतींकरैः ध्येयाबंधूकसंका
शां कौमारींकामदायिनीं ॐ ह्रीं कुीं कौमारीएह्येहीत्यादि वामे चक्रघंटांकपालंचशंखंचदधतींकरैः तमालश्यामलांध्येयां वैष्णवींविभ्रमो
ज्वलां २ ॐ ह्रीं श्रीं वैष्णवीएह्येहीत्यादि चिन्त्यस्यादिद्वारदेवताअभिवंद्य औदुंबरंचविकंटयाम्येतोरणमुत्तमं रक्षार्थंचैवबध्नामिचंडीपू
जाख्यकर्मणि इषेत्वेति तोरणं पूर्ववत्कलशमावाह्यस्थापयेत् कर्मनिष्ठौतपोयुक्तौब्राह्मणौवेदपारगौ देवीसूक्तंजपार्थंचद्वारेभवतम्
हिजौ अहंरुद्रेभिरिति कातराक्षोयजुर्वेदिश्चेष्टुभोब्रह्मदेवतः कारयपस्तुनिप्रेंद्र कुलिकहंसांनिधिभवि इषेत्वेतियजुर्वेदिंपूजयेत् धूम्र ४

वर्णं पताकां च कृष्णवर्णं ध्वजं तथा यमाय स्थापयामीह नैर्ऋते कर्मसाक्षिणे स इषुर्हस्तैरार्यं गौरीत्ति यम श्रीसूर्यध्वजपताके स्थापयामि तत्र वामनं दि
ग्गजं आवाह्य याम्ये गदाशक्तिधरश्च शूरो वरप्रदो याम्यमुखोतिरिक्तः कुजस्त्ववंती विषये। त्रिकोणे तस्मिन्भरद्वाजकुलेप्रसूतः अग्निर्मूर्धेति अधि
देवताप्रत्यधिदेवतासहित अंगारक एह्येहि इत्यादि यमस्तु नीलवर्णाभः किरीटी दंडभृत्सदा धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः सुगं नः पंथा इति यमं
संपूज्य यम एह्येहीति धनुर्बाणकरं देवं खड्गपात्रधरं तथा त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरं कौमारीशक्तिसंयुक्तं शीखिवाहनभूषितं गौरवर्णधरं दे
वं वंदे श्रीचंडभैरवं ॐ ह्रीं उं चंडभैरव एह्येहि इत्यादि अथ निर्ऋतीशाय कृष्णं नीलमयं ध्वजं स्थापयामि सदा रक्षोगणाधीशाय चैवहि बृहस्पतेपरि
दीयासु त्वं तमयजमानमिति मंत्रेण। निर्ऋति श्रीसूर्यध्वजपताके स्थापयामि तत्र कुमुदं दिग्गजं पुंडरीकं लक्ष्मीगजमावाह्य पैठीनसौ बर्बरिदेशाजातः शू
पसिनः सिंहगमः सुधूम्रः याम्याननो विकटास्यः करालो वरप्रदः शूलसच्चमखिड्ग। कयानश्चित्र इति अधिदेवताप्रत्यधिदेवतासहित राहो ए
ह्येहि निर्ऋतिरक्तवर्णाभो भयदो रक्षसाधिपः खड्गहस्तो महाभीमस्तस्मै नित्यं नमो नमः ॐ असुन्वंतं ॐ ह्रीं क्षं निर्ऋते एह्येहि शंखचक्रधरं दे
वं पानपात्रं गदाधरं त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरं वैष्णवीशक्तिसंयुक्तं गरुडवाहनभूषितं नीलवर्णधरं देवं वंदे श्रीक्रोधभैरवं ॐ ह्रीं क्रं क्रोध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भैरवदासेहीति अथपश्चिमद्वारभागस ॐ ह्रीं श्वे तक्रौ वोरीश्वे तारूदेधाशहस्ते एह्येहि· द्वारदक्षिणपार्श्वे दक्षिणे मुसलंकरवालंमरवेटकं दधती
हलं करैश्चतुर्भिर्वाराहीध्येयाकालघनाभी ॐ ह्रीं हूं वाराहिएह्येहि· अथाचीच्छन्त्यादि द्वारदेवताः पूजयेत् आग्नेय्यां पश्चिमे भागे तोरणं रत्नसंनिभं
रक्षार्थं चैव बध्नामि चंडीपूजारव्यकर्मणि अत्र आयाहीति तोरणं पूर्ववत्के लशाराधनं कर्मनिष्ठौ· दुर्गसूक्तजपार्थं च द्वारे भवतमूलिजो सा
मवेदस्तु। पिंगाक्षो जागतः शाक्रदैवतः भारद्वाजश्चविप्रेंद्रः क्रुलिन्हृहंसांनिधौ भव अत्र आयाहीति साम वेदमावाहयामि श्वेतवर्णंपिताकांचध्व
जंपीतमर्यंतथा वरुणाय जले शायस्थापयाभिनुभावनु बकाविज्ञायः इति वरुणप्रीत्यर्थं ध्वजपताके स्थापयेत्. तत्रांजनं दिग्गजमावाह्य चापासनो
गृध्ररथः सुनीलः प्रसन्नमुखः काश्यपजः प्रतीच्यां सद्धूलं चापेषुमरप्रदश्च सौराष्ट्रदेशोद्भव श्च सौरी शामाग्निरिति अधिदेवताप्रत्यधिदेवता
सहित शनैश्चरदासेहीत्यादि वरुणो घवलोत्तविष्णुकुरूपो निर्मलो बुधः पाशहस्तो महाभीमस्तस्मै। वरुणं नमो नमः तवाह्याम्यामि ॐ ह्रीं वं वरुण एह्ये
हीति खट्वांगं मुसलं चैव करवालं च पात्रकं। त्रिनेत्रं वरदं भीमं कुमारं च दिगंबरं हेमवर्णधरं देवं महिषवाहनभूषणं वाराही शक्तिसंयुक्तं वंदे [illegible] मत्तभैरे
वं ॐ ह्रीं [illegible] उन्मत्तभैरव एह्येहीति अथवायव्ये ॐ ह्रीं हूं हरितेमृगवाहिनि अंकुशाएह्येहि पताकां वायव्येश्वेतां ध्वजंपीतमर्यं तथा स्थापयाम्यणुरू ५

लं

हस्ते

श्च

पायप्राणदायसदैवाह गोत्रभिदंमानोनियुत्क्ष्वरिति वायुप्रीत्यर्थंध्वजपताकेस्थापयामि तत्रपुष्पदंतंदिग्गजं गुगुलं लक्ष्मीगजमावाह्य ध्व
जासनोजोभिनिगोत्रजातस्यैदीनिदेशः सुनीचैत्रवर्णः याम्यानमोवायुर्दोशिप्रखङ्गाभ्यर्मः सुरवीन्चाष्टशलेधनैकः केतुंकुष्मनकेतवइति अधि
देवताप्रसधिदेवतासहितकेतोएहीहीति पाशांवज्रायुधंचैवकरवालंचपात्रकं त्रिनेत्रंवरदंशांतंकुमारंचदिगंबरं इंद्राणीशक्तिसंयुक्तंगजवाहनभूषि
तंपद्मरागप्रभंदेवं वंदेकपालभैरवं एह्येहीमादि अथोत्तरे ॐ ह्रींयांसिंहवाहिनिगदाहस्तेएह्येहि॰ द्वारदक्षिणपार्श्वे स्थूलंकृपाणं नाशिरः कपालंदध
तीकरैः मुंडस्त्रग्मंडितांध्येयांचामुंडांरक्तविग्रहां ॐ ह्रींस्फेंचामुंडेएह्येहि अक्षस्त्रजंबीजपूरं कपालंपंकजंकरैः वहंतीहेमसंकाशांमहालक्ष्मींस
मीरितां ॐ ह्रींश्रीं लक्ष्मीएह्येहि वामपार्श्वेप्रस्त्यादिद्वारदेवताः पूजयेत सुप्रभंतोरणं प्राक्षं उत्तरेचशाहीप्रभं रक्षार्थंचैवबधाभिचंडीमू
जाख्यकर्माणी शंनोदेवीतितोरणं पूर्वस्मिंलशारधनं कर्मनिष्टो॰ शारदास्तकपाठार्थंद्विरेभवतमूर्हिजो कृष्णाभ्यानुष्टुभोथर्वदेव्यैवेंद्रदेवतः
वैजनिक्षेन विप्रेंद्रकातिकृतंसंनिधोभव शंनोदेवीरिति अथर्ववेदमावास्य श्वेतवर्णपिताकांचपद्माभंचध्वजंतथा सोमायस्थापयामेवं
धनधान्यसमृध्द्यै वयंसोम॰ अभिगोत्राणीतिकुबेरप्रीत्यर्थंध्वजपताकेस्थापयामि सोम्येसुदीर्घेचितुरस्रपीठेरथंगिराः सोम्यपुण्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शा॰ चं॰ वि॰
६

सुपीतः दंडाक्षमालावरदांबुपात्र सिंधवाख्यदेशोवरदः सुजीवः बृहस्पते अधीप्रधिदेवता प्रत्यधिदेवतासहित बृहस्पते एह्येहि गौरोयस्तु पु
मान् च्युतो सर्वोपाधिरसात्मयः नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमोनमः वयंसोमः ॐ ह्रीं सोम एह्येहि शूलकाधुधं चडमरुं शाक्तिं चैव चपात्रकं
त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरं चामुंडाशक्ति संयुक्तं प्रेतवाहनभूषितं रक्तवर्णधरं देवं वंदे भीषण भैरवं ॐ ह्रीं अं भीषण भैरव एह्येहि
अथेशान्ये ॐ ह्रीं कंकालि वृषभारूढे शूलहस्ते एह्येह्यागच्छागच्छ ईशान्यां ध्वजं श्वेतं पताकां चैव लां तथा स्थापयामि महेशाय वृषभारूढा
यशूलिने आवोराजानं आराते गोघ्र इति ईशानप्रीत्यर्थं ध्वजपताके स्थापयामि तत्र सुप्रतीकं दिग्गजं कुरंडकं लक्ष्मीगजमावाह्य उदङ्मुखो
मागधजोहरिस्थश्चात्रेयगोत्रः शरमंडलस्थः सचर्मखड्गारूढो दारोरूस्त्वीशानभागे वरदः सुपीतः उद्बुध्यध्वामीति अधिदेवताप्रत्य
धिदेवतासहित बुध एह्येहि इत्यादि ईशानः पुरुषः शुक्लः सर्वविद्याधिपो हरः शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमोनमः तमीशानामिति ॐ
ह्रीं ईशान एह्येह्यागच्छागच्छ गंधपुष्पधूपदीपसहितं इमं दधिदीरान बालिं गृहाण ममोदयं कुरुकुरु स्वाहा शूलं चडमरुं चैव शंखं च क्रगदाधरं ख
ड्गपात्रं च खट्वांगं पाशांकुशधरं तथा दशबाहुं त्रिनेत्रं च सर्पयज्ञोपवीतिनं दिगंबरं कुमारं च हंसवाहनभूषितं दंष्ट्राकरालवदन ६

५।१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्षेश्चर्यसुरवरप्रदं दैसमस्तकमालांचमङ्गुश्रम्हांडभालिकां धारयंतंमदोन्मत्तंबडवानलभैरवं चांडिकाशक्तिसंयुक्तंवंदेसंहारभैरवं ॐ ह्रीं अंसंहार
भैरवएह्येहि० ईशानपूर्वमध्ये ॐ ह्रीं सं सर्वाद्येअग्निवाहनेचक्रहस्तेएह्येहीति भूमेसर्वलोकानां आधारासिवरप्रदे पंचवर्णपिताकांचस्था
पयामिध्वजंतथा अभीषांमहीद्यौरिति भूमिप्रीत्यर्थंध्वजपताकेस्थापयामि विशालवसुधाभूमीरत्नगर्भरिथिप्रदा विष्णुप्रियेजगद्धात्री तस्मै
नित्यं नमोनमः स्योनापृथिवीति ॐ ह्रीं लंभूमे एह्येह्यागच्छागच्छ० पश्चिमानिर्ऋतिमध्ये ॐ ह्रीं सं सुरश्रेष्ठे हंसवाहने अक्षसूत्रकमंडलु
हस्ते एह्येहि० स्थापयाम्यंतरिक्षायपताकांसार्वर्णिकां कनकाकाररूपायनिराकारायचध्वजं इदंद्यावापृथिवीमानोरक्षो अभिनए अंतरि
क्ष प्रीत्यर्थंध्वजपताकेस्थापयामि भूताधारानिराकार विश्वरूपचलाचल अंतरिक्षनमस्तेस्तु पाहियज्ञंममप्रभो अस्मेरुद्रा० ॐ ह्रीं हुं अंत
रिक्ष एह्येहि० मंडलमध्यदेशे आदित्यावसवोरुद्रा वषट्कारप्रजापते ध्वजांचित्रंपताकांचस्थापयामीह भोसुराः आदित्यारुद्रावसवः सुनीथाश्रुति
फल
सकलदेवताप्रीत्यर्थंध्वजपताकेस्थापयामि यज्ञभागभुजो देवाः सर्वकर्मप्रदाः यज्ञंपातुसमागत्य नमस्तेभ्यो नमोनमः आदित्यावसवोरुद्रा
वषट्कारप्रजापते एतयातागच्छतागच्छत० वेदिकामाग्नेयेमेघवर्णंपिताकांचस्थापयामीह विष्णवे चतुर्भुजायदेवाय ध्वजंश्रीसहितायच व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा·चं·वि· पदं तो विष्णोरिति विष्णुप्रीत्यर्थं ध्वजपताके स्थापयामि चतुर्भुजः श्रियायुक्तो गोविंदो गरुडासनः नारायणो महाविष्णुस्तस्मै नित्यं नमो नमः इदं विष्णुः
८ विष्णो इहागच्छ इहागच्छ वेदिकायाः पूर्वे गौरीशाय त्रिनेत्राय जाह्नवीशशिमौलिने ध्वजं श्वेतपताकां च रुद्राय स्थापयाम्यहं सुतिभ्युतं रुद्रप्रीत्यर्थं ध्वजपता
के स्थापयामि त्रिलोचनो वृषा रूढो भूतिदो भूतिभूषणः गौरीसमन्वितो देवस्तस्मै नित्यं नमो नमः कद्रुद्राय० ॐ ह्रीं रुद्र इहागच्छ इहागच्छ० वेदिकायां
ईशान्ये वागीशाय सुरेशाय कमंडलुधराय च पद्मवर्णां पताकां च ब्रह्मेशास्थापयाम्यहं ब्रह्मणस्पते ब्रह्मप्रीत्यर्थं ध्वजपताके स्थापयामि ब्र
ह्मा सरस्वतीनाथो हंसारूढो जगत्पतिः वेदगर्भस्सुताधीशस्तस्मै नित्यं नमो नमः ब्रह्मणस्पते० ऐं ब्रह्मन्निहागच्छ० वेदिकायाः पश्चिमे सिंदूराक्तं
पताकां च ध्वजं चैव तथैव च स्थापयामि गणेशाय पाशांकुशधराय च गणानांत्वेति श्रीमहागणपति प्रीत्यर्थं ध्वजपताके स्थापयामि पाशांकुश
धरामीति लंबस्तु गजाननः गणेशो मूषकारूढस्तस्मै० निषुसीद गणपते० गं गणपते इहागच्छ० मंडपमध्यशिखरे देव्या दक्षिणभागे ध्वजं चैव
पताकां च नीलांजनसमप्रभां स्थापयामि महाकाल्यै चंडीमुंडारव्यकर्मणि गौरीर्मिमायेति महाकाली प्रीत्यर्थं ध्वजपताके स्थापयामि दशवक्त्रा
दशभुजा त्रिनेत्रस्योत्क्रां ध्यायाहा गौरीर्मिमाय० ॐ ऐं ह्रीं क्लीं महाकालि इहागच्छ० मध्यशिखरे सर्वदेवशरीरिण्यै महालक्ष्म्यै सुश्वेतं ध्वजं चैव ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पताकां चस्थापयामि मंत्रोह्युतं जातवेदसे० श्रीमहालक्ष्मीप्रीत्यर्थं ध्वजपताके स्थापयामि ॥ श्वेतान नानीलभुजेसादिरहस्योक्तां ध्यात्वा -
जातवेदसे० ॐ ऐं ह्रीं क्लीं श्रीमहालक्ष्मिएह्येहि० देव्यावामभागे श्वेतवर्णपिताकांच ध्वजं श्वेतमयं तथा स्थापयामिसरस्वत्यै चंडीपूजाख्यक
मणि प्रणोदेवी० श्रीमहासरस्वतीप्रीत्यर्थं ध्वजपताके स्थापयामि दधोसाष्टभुजा बाणाभितिरहस्योक्तां ध्यात्वा यद्वाग्वदंत० ॐ ऐं ह्रीं क्लीं महासरस्वति
एह्येहि भागछागध गंधपुष्पधूपदीपसहितं इमं क्षीरान्नंबलिं गृहाण ममेप्सितं कुरु कुरु स्वाहा ॥ इतिडामरादितंत्रसारे देवीमहोत्सवे मंडपपू-
जानामतृतीयावसरः ॥ अपसर्पंतिति पठित्वा वामपादपार्ष्णिना त्रिवारं भूमेस्ताडनं कृत्वाभौमान् भूतान पसार्य अस्त्रमंत्राभिमंत्रितं जलं परितः
क्षिप्त्वा अंतरीक्षचरानाधरूर्ध्वचाष्टदिक्षु दिव्यदृष्टिनिरीक्षणेन दिव्यान्दिव्यान्भूतान् च्छोटिकयापसार्य अंतरितंरक्षोंतरिता अरातय इतिमंत्रेण
भूतानिगतानीतिस्मृत्वा निराकुलानां भूतानां वा मार्गसंकोचनमार्गदित्वा अस्त्रमंत्रेण तालत्रयं नाराचमुद्रया दिग्बंधनं त्रिशूलमुद्रयाग्निप्राकारंच
परितोरक्षांविधायपश्चिमद्वारमार्गेण पादपुरःसरं अंतः प्रविश्य मध्ये वास्तुपुरुषाय नमइति गंधपुष्पबलिभिः वास्तुपुरुषंसंपूज्य तत्र श्रीपर्णीका
ष्ठासनेचित्रकंबलंपरिकल्प्य आत्मासनाय नमः योगासनायनमः सुखासनायनमः इष्टासनदेवताः संपूज्यतत्र प्राङ्मुखउपविश्यगुर्वादी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभिबंध प्राणानायम्यसंकल्प भूतशुध्दि प्राणप्रतिष्ठां तन्मातृकां कुर्यात् तद्यथा मूलाधारोच्छि तां प्राणशक्तिं ॐ ह्रीं हंसः सोहमिति मंत्रेण सुषु
म्नामार्गेण ब्रह्मरंध्रं नीत्वा तत्र परमात्मनि जीवात्मानं संयोज्य स्थूलदेहोपसंहारं भावयेत् पादादिजानुपर्यंतं पृथ्वीस्थानं चतुरस्रं पीतवर्णं वज्रलांछि
तं तन्मध्ये लं बीजं ॐ लं फट् जले प्रविलापयामि जान्वादिनाभिपर्यंतं अर्धचंद्राकारमापस्थानं शुक्लवर्णपद्मलांछितं तन्मध्ये वं बीजं ॐ वं
फट् तेजसि प्र॰ नाभ्यादिकंठपर्यंतं त्रिकोणं रक्तवर्णमग्निस्थानं स्वास्तिकलांछितं तन्मध्ये रं बीजं ॐ रं फट् वायौ संहरामि कंठादि भ्रूमध्यपर्यं
तं षट्कोणं कृष्णवर्णवायुस्थानं षड्बिंदुलांछितं तन्मध्ये यं बीजं ॐ यं फट् आकाशे संहरामि भ्रूमध्याद्ब्रह्मरंध्रपर्यंतं धूम्रवर्णं वृत्तमाकाशस्थानं ध्व
जलांछितं तन्मध्ये हं बीजं ॐ हं फट् अहंकारे प्र॰ अहंकारं महत्तत्त्वे महत्तत्त्वं प्रकृतौ प्रकृतिं परमात्मनि श्रीमहालक्ष्म्यभिधे ब्रह्मणि प्रविलापयामि
सूक्ष्मदेहोपसंहारं भावयेत् वासनामयं पापपुरुषं कृष्णं भीममधोमुखं दक्षकुक्षौ विचिंतयामीति वायुबीजं षोडशवारमावर्तयन् दक्षिणया
पूरयेत् तेन तं शुष्कं स्मृत्वा रामित्यग्निबीजं चतुःषष्ठिवारमावर्तयन् कुंभयेत् तेन तं दग्धं विचिंत्य पुनर्यामिति वायुबीजं द्वात्रिंशद्वारमावर्तय
न् वामया रेचयेत् तेन तद्भस्म दक्षिणनाड्या बहिर्गतं विचिंत्य ॐ वं इत्यमृतबीजं मस्तके स्मृत्वा अमृतधारां जीवनीं विचिंत्य लामित्याधारे तेन ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहापिंडं विचिंत्य इं इतिहृदये आकाशबीजेन देहाकार नवयवा. ध्यात्वास्य जीवकलां ह्रीं सोहं हंसः इतिमंत्रेण देहे प्रविशं ध्यात्वा महालक्ष्मीरूप प्रलक्षणः सकाशा
त्प्रकृतिः प्रकृतेर्महान् महतोऽहंकारः अहंकारादाकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधी-
भ्योन्नं अन्नाद्रेतः रेतसः पुरुषइति क्रमाद्देहादिस्वरूपेण च महालक्ष्मीरूपोहमिति भावयेत् इति भूतशुद्धिः अस्य श्री प्राण प्रतिष्ठा मंत्रस्य ब्रह्माविष्णुमहे
श्वरा ऋषयः ऋग्यजुः सामाथर्वणानि छंदांसि चैतन्यरूपा प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं प्राण प्रतिष्ठा[illegible]पने विनियोगः ॐ ह्रीं अं आं ह्रीं
क्रों कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने अंगुष्ठहृदयै ॐ ह्रीं इं आं ह्रीं क्रों चं छं जं झं ञं शब्द स्पर्शरूपरसगंधात्मने ईं तर्जनीशिरः ॐ ह्रीं ऊं टं ठं डं
ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाशिखां ॐ ह्रीं एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाकवचं ॐ ह्रीं ओं पं फं बं भं मं वचनादा
नविहारविसर्गानंदात्मने औं कनिष्ठिकां [illegible] नेत्रत्रयं ॐ ह्रीं अं यं रं लं वं शं षं हं क्षं बुद्धिमनोहंकारचित्तविज्ञानात्मने अः करतलमस्त्रं ध्यानं रक्तांभोधिस्थ
पोतोल्लसदरुणसरोजाधिरूढाकाराब्जैः पाशांकोदंडमिक्षूद्भवगुणमथाप्यंकुशं पंचबाणान् बिभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षोरुहाढ्या देवी
बालार्कवर्णाभवतुसुखकरी प्राणशक्तिः परा नः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः क्रों ह्रीं आं मम प्राण इह प्राणा मम बीज इह स्थितः मम सर्वेंद्रियाणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति त्रिः प्रणवेन पंचदश संस्कारान् भावयेत् इति प्राणप्रतिष्ठा अस्य श्री अंतर्मातृका सरस्वती मंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः
मातृका सरस्वती देवता हलो बीजानि स्वराः शक्तयः ॥ क्षं कीलकं अंतर्मातृकाप्रीत्यर्थे न्यासे विनियोगः ॐ ह्रीं अं कं खं गं घं ङं आं अंगुष्ठ हृदयं ॐ ह्रीं इं चं छं
जं झं ञं ईं तर्जनीशिरः ॐ ह्रीं उं टं ठं डं ढं णं मध्यमाशिखा ॐ ह्रीं एं तं थं दं धं नं ऐं अनामिकाकवचं ॐ ह्रीं ओं पं फं बं भं मं औं कनिष्ठिका नेत्रत्रयं ॐ ह्रीं अं यं रं
लं वं शं षं हं ळं क्षं अः करतलमस्त्रं ध्यानं व्योमेंदौ रसनार्णकर्णिकमलेवृंदे स्फुरत्केसरं पार्श्वे तत्र गतिपंचवर्गयशलादावर्णादि वर्णक्रमात् आशास्यत्रिपुलांतलां
गालियुजं क्षोणीपुरेणावृतं वर्णाब्जं त्रिवसांस्थितं विषगदप्रध्वंसि मृत्युंजयं अथ न्यासक्रमः अकारादिषोडशस्वराः कंठपद्मे षोडशदले ककारादिठकारांताः
हृदये द्वादशदले डकारादिफकारांताः नाभिपद्मे दशदले बकारादिलकारांताः स्वाधिष्ठाने षड्दले वकारादिसकारांतं आधारादि चतुर्दले हं नमः क्षं नमः
लत्काहोद्विपत्रे अथ सृष्टिमातृका ऋष्यादिकं पूर्ववत् ध्यानं पंचाशल्लिपिभिर्विभक्तवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुं	
दावदातां अक्षस्रक्कुंभचिंतालिखितवरकरां त्र्यक्षणां पद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारती तां नमामि ॐ ह्रीं अं नमः शिरसि ॐ ह्रीं आं नमः
मुखवृत्ते इं ईं नेत्रयोः ॐ उं ऊं कर्णयोः ॐ ऋं ॠं नासापुटयोः ॐ ऌं ॡं कपोलयोः ॐ एं ऐं दंतपंक्त्योः ॐ ओं औं ओष्ठयोः ॥ ॐ अं जिह्वामूले ॐ अः ता	

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लौं कं ५ दक्षिणकरसंधिषु ॐ चं ५ वामकरसंधिषु टं ५ दक्षिणपादसंध्यग्रेषु तं ५ वामपादसंध्यग्रेषु पं फं कुक्षिद्वये बं पृष्ठे भं नाभौ मं जठरे यं हृ
दये रं कंठमूले लं गुदे वं बाहुमूले शं हृदयादि दक्षिणकक्षांतं षं हृदयादि वामकक्षांतं सं हृदयादि दक्षिणपादे हं हृदयादि वामपादे लं व्यापकं अथ
निवृत्त्यादिकलामातृकान्यासः अस्य कलामातृकामंत्रस्य प्रजापतिर्ऋषिः गायत्रीछंदः कलासरस्वती देवता ममेप्सितार्थे न्यासे विनियोगः ॐ ह्रीं अं कं
५ आं अंगु० ॐ ह्रीं इं चं ५ ईं तर्जनी० ॐ ह्रीं उं टं ५ ऊं मध्यमा० ॐ ह्रीं एं तं ५ ऐं अनामि० ॐ ह्रीं ओं पं ५ औं कनिष्ठिका० ॐ ह्रीं अं यं ३० अः करतल० ए
वं हृदयादि ध्यानं अक्षैः पक्षं रथांगं गुणमथ हरिणं पुस्तकं वर्णमालां टंकं शूलं कपालं वरदमृत ... सधट्टेम कुंभं वसंतं मुक्तापद्मसुप्रयोदस्फटिक नव
जपाबंधुरौ पंचवक्त्रैः स्त्र्यक्षैर्वक्षोजनम्रा सकलशशिनिभां शारदां तां नमामि एवं मातृकोक्तस्थानेषु न्यसेत् ॐ ह्रीं अं निवृत्त्यै नमः ॐ ह्रीं आं प्रतिष्ठा
यै नमः ह्रीं ... विद्यायै० ईं शांत्यै० उं इंधिकायै० ऊं दीपिकायै० ऋं रेचिकायै० ॠं मोचिकायै० लृं परायै० ॡं सूक्ष्मायै० एं सूक्ष्मा
मृतायै० ऐं ज्ञानामृतायै० ॐ साप्यायिन्यै० औं व्यापिन्यै० अं व्योमरूपायै० अः अनंतायै० कं सृष्ट्यै० खं ऋद्ध्यै० गं स्मृत्यै० घं मेधायै० ङं कांत्यै० चं लक्ष्म्यै० छं द्युत्यै
० जं स्थिरायै० झं स्थित्यै० ञं सिद्ध्यै० टं जरायै० ठं पालिन्यै० डं शांत्यै० ढं ऐश्वर्यै० णं रत्यनुग्रहायै० तं कामिन्यै० थं वरदायै० दं आह्लादिन्यै० धं प्रीत्यै० नं दीर्घायै०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा·चं·वि· पं तीक्ष्णायै॰ फं रौद्रायै॰ वं अभयायै॰ भं निद्रायै॰ मं तंद्रायै॰ यं क्षुधायै॰ रं क्रोधिन्यै॰ लं कृपायै॰ वं वेदिन्यै॰ शं भूमवे॰ षं पीतायै॰ सं श्वेतायै॰ हं अरुणायै॰ ळं अ
१० सितायै॰ क्षं अनंतायै नमः इति न्यसेत् इति कलान्यासः मूलेन प्राणानायम्य सृष्ट्यादिकं स्मृत्वा एकादश न्यासं कुर्यात् तद्यथा अस्य श्री नवार्णवपूर्वक सप्तशतिका
मालामंत्रस्य ब्रह्म विष्णु महेश्वरा ऋषयः श्रीमहाकाली महालक्ष्मी महासरस्वती देवताः गायत्र्युष्णिगनुष्टुप् छंदांसि नंदजा शाकंबरी भीमाः शक्तयः रक्तादंति
का दुर्गा भ्रामरी बीजानि अग्निवायुः सूर्यस्तत्त्वानि श्रीमहाकाली महालक्ष्मी महासरस्वती प्रीत्यर्थं जपपूजा होमे विनियोगः अथैकादशन्यासः अकारादिक्षरांत
मातृकाः मायाबीजयुक्ताः सृष्टिमातृकास्थानेषु विन्यसेत् यथा ॐ अं नमः पृथ्वीत्यादि इति मातृकान्यासः प्रथमः अथ सारस्वतः ॐ ह्रीं ऐं क्लीं नमः
कनिष्ठिकयोः ॐ ह्रीं ऐं क्लीं अनामिकयोः ॐ ऐं ह्रीं क्लीं मध्यमयोः ॐ ह्रीं क्लीं तर्जन्योः ॐ ह्रीं क्लीं अंगुष्ठयोः ॐ ऐं ह्रीं क्लीं करतलयोः ॐ ऐं ह्रीं क्लीं नमः
स्कारेण दिग्बंधे एवं हृदयादिषु इति द्वितीयः अथ दशादिक्षु मातृकान्यासः ॐ ऐं ह्रीं ब्राह्म्यै नमः पूर्वे ॐ ह्रीं हें माहेश्वर्यै नमः आग्नेये ॐ ह्रीं
क्लीं नमः कौमार्यै नमः दक्षिणे ॐ ह्रीं श्रीं वैष्णव्यै॰ नैरृत्ये ॐ ह्रां हूं वाराह्यै॰ पश्चिमे ॐ ह्रीं लं इंद्राण्यै॰ वायव्ये ॐ ह्रीं [illegible] नारसिंह्यै॰ उत्तरे ॐ क्ष्म्यैं।
ह्रीं क्रें चामुंडायै॰ ईशान्ये ॐ ह्रीं हूं व्योमेश्वर्यै॰ ऊर्ध्वे ॐ ह्रीं लं सप्तद्वीपेश्वर्यै भूवे ॐ ह्रीं नागेश्वर्यै पाताले इति तृतीयः अथ षड्देवीन्यासः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रैं
ॐ नंदायै० पूर्वभागे ॐ ह्रैं रक्तदंतिकायै० दक्षिणभागे ॐ ह्रैं शाकंभर्यै० पश्चिमांगे ॐ ह्रैं दुर्गायै० वामांगे ॐ हूं भीमायै न० मस्तकाच्चरणावधि-
ॐ श्रीं भ्रामर्यै० पादादिमस्तकावधि इति चतुर्थः अथ ब्रह्मविष्णु महेश्वरन्यासः ॐ ह्रीं एं ब्रह्मणे नमः पादादि नाभि ॐ ह्रीं श्रीं नाभेराहृदयं ॐ ह्रीं ह्रौं हृं
दयादि शिरवा ॐ ह्रीं हंसाय० पादयोः ॐ ह्रीं वैं नैतेयाय० करयोः ॐ ह्रीं वृषभाय० चक्षुषोः ॐ ह्रीं गं गजाननाय० सर्वांगेषु ॐ ह्रीं हरये नमः परात्पर
ह्रः इति पंचमः ॐ ह्रीं महालक्ष्म्यै० मध्यदेहस्य ॐ ह्रीं एं सरस्वत्यै० ऊर्ध्वदेहस्य ॐ ह्रीं क्लीं महाकाल्यै० अधोदेहस्य ॐ क्ष्म्रौं सिंहाय० हस्तयोः ॐ ह्रीं
हुं हंसाय० नेत्रयोः ॐ ह्रां हूं महिषाय० पादयोः ॐ ह्रीं चंडिकायै० व्यापकं अथ षष्ठो बीजन्यासः ॐ ऐं ब्रह्मरंध्रे ॐ ह्रीं दक्षिणनेत्रे ॐ क्लीं वामनेत्रे-
ॐ चां दक्षिणकर्णे ॐ मुं वामकर्णे ॐ डां नासिकायां ॐ यैं मुखे ॐ विं लिंगे ॐ च्चें पायु इति सप्तमः इमानि बीजानि पा[illegible]दि ब्रह्मरंध्रपर्यंतं- प्वा
न्यसेत् ॥ इत्यष्टमः पूर्वदक्षिणपश्चिमवामांगे मस्तकाच्चरणावधि चरणान्मस्तकावधि सकृत्सकृत् मूलमंत्रं न्यसेत् इति नवमः समग्रमूलमंत्रेण षडंगन्या
स इति दशमः अथैकादशः ऐंरवाङ्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा शंखिनी चापिनी बाणा भुशुंडी परिघायुधा इति हृदये न्यसेत् शूलेन पाहि
नो देवी पाहि खड्गेन चांबिके घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौम्यानियानिरूपाणि त्रैलोक्ये विचरंति ते यानिचात्यंतघोराणि तै रक्षास्मांस्तथा भुवं खड्गशूलगदादीनि यानिचास्त्राणि तेंऽबिके करपल्लवसंगीनि तैरस्मान्रक्षस
र्वतः इतिमूर्ध्नि सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते एतत्ते वदनं सौम्यं लोचनत्रयभूषितं पातु नः सर्वभीतिभ्यः
भ्यः कात्यायनि नमोस्तु ते ज्वालाकरालमत्युग्रमशेषासुरसूदनं त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते हिनास्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् सा घंटा
पातु नो देवि पापेभ्यो नः सुतानिव असुरासृग्वसापंकचर्चितस्ते करोज्वलः शुभाय खड्गो भवतु चंडिके त्वां नता वयं इति शरीरव्यापकं न्यसेत् इत्येकादशन्यासः
न्यासस्थैर्यसिध्यर्थं संहृत्य मुद्रां प्रदर्श्य रहस्योक्तां महिषमर्दिनीं ध्यायेत् यथा श्वेताननानीलभुजा सुश्वेतस्तनमंडला रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा
सुचित्रजघना चित्रमाल्यांबरविभूषणा चित्रानुलेपना कांतिरूपसौभाग्यदायिनी अष्टादशभुजापूज्या सा सहस्रभुजा सती आयुधान्यत्र वक्ष्यंते दक्षिणाधःक्र
रक्रमात् अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुः अलंकृतभुजामेभिरायु
धैः कमलासनां इति ध्यात्वा स्वहृत्कमले मानसैरुपचारैरभ्यर्च्य यथाशक्ति नवार्णमंत्रं जपेत् इति श्रीडामरादितंत्रसारे देवीमहोत्सवे न्यासध्यानविधिर्नाम
चतुर्थो विसरः ॥ अथ पूजामंडपे वेदिकां कृत्वा तत्र समृत्स्नानि निक्षिपेत् तन्मध्ये निर्मलं कूपपृष्ठं कलशं रत्नसमन्वितं संस्थाप्य रक्तवस्त्रेण वेष्ट्य तस्योपरि यंत्रं ११

६३ श्लोक

संलिख्य प्रतिष्ठाप्य तन्मध्ये हेममयीं रहस्योक्तां चंडिकामूर्तिं पंचामृतैः स्नाप्य रक्तवस्त्रेण वासयित्वा गंधपुष्पालंकारैरलंकृत्य संस्थाप्य गुरूपदेशविधिना पू
जयेत् अथ शंखपूजां कुर्यात् तद्यथा स्वपुरतो वामभागे स्वप्रक्षालित मूलमंत्रपूरितोदकं कलशं निधाय तदुपरि सौरस्त्रप्रक्षालितं मूलमंत्रपूरितोदकं शंखं
निधाय देवताया दक्षिणभागे स्वप्रक्षालितानि मूलमंत्रपूरितोदकानि चत्वारि पात्राणि स्थापयेत् तत्र पुष्पादिदत्वपत्राणि गंधादिकर्पुरतो विन्यस्य शंखजलं प्रि
त् तत्रात्रिकोणं षट्कोणं चतुरस्रं मंडलं मत्स्यमुद्रयाकृत्वा गोमयेनानुलिप्य दक्षिणकरे शंखमुद्रामावध्याव्यभ्य तत्र वह्नेर्दशकलाः पूजयेत् धूम्रायै नमः ऊष्मा
यै नमः ज्वालिन्यै ज्वालिन्यै विष्फुलिंगिन्यै सुश्रियै सुरूपायै कपिलायै हव्यवाहनायै कव्यवाहनायै इत्यभ्यर्च्य षट्कोणे श्रीशासुरनामकोणे मुद्रयादिक
वर्चांतं पुरतो नेत्रं दिक्षु चास्त्रमभ्यर्च्य तदुपर्यस्त्रप्रक्षालितं शंखं प्रतिष्ठाप्य तत्र सूर्यद्वादशकलाः पूजयेत् तपिन्यै तापिन्यै २ धूम्रायै ३ मरीच्यै ४ ज्वालिन्यै ५
रुच्यै ६ सुषुम्नायै ७ भोगदायै ८ विश्वायै ९ बोधिन्यै १० धारिण्यै ११ क्षमायै १२ एताः शंखस्योपरि समभ्यर्च्य गंधपुष्पाक्षतादीन् हृदयमंत्रेण निक्षिप्य प्रातिलोम
मातृकया तांत्रिकतीर्थमापूर्य तन्मध्ये सोमस्य षोडशकलाः पूजयेत् ॐ अमृतायै १ मानदायै २ पूषायै ३ तुष्ट्यै ४ पुष्ट्यै ५ रत्यै ६ धृत्यै ७ शशिन्यै ८ चंद्रिकायै ९ कान्त्यै १०
ज्योत्स्नायै ११ श्रियै १२ प्रीतिरंगदायै १३ पूर्णायै १४ पूर्णामृतायै १५ कामदायिन्यै १६ तदुपरि गंगेत्यादितीर्थमंत्रेण क्रोमिति अंकुशमुद्रया सवितृमंडलात्तीर्थमाकृष्य

दा

शा॰पं॰वि॰ आवाहनादिमुद्राः प्रदर्श्य शिरमंत्रेण गालिनीमुद्रयाच्छादयेत् निर्विषीभवेत् गरुडमुद्रया सुपरिपूर्णं भावयेत् सुरभिमुद्रया इदममृतरूपं अमृतमुद्रां दर्शयित्वा नय
१२ नमंत्रमुच्चारयन् अमृतदृष्ट्या संवीक्ष्य कवचमंत्रमुच्चारयन् संव्याप्य सकलीकृत्य तदंगे अंगानि विन्यस्य अस्त्रमंत्रादि बंधनं विधाय मूलमंत्रेण गंधपुष्पाक्षतैरभ्य
र्च्य हस्तेनाच्छाद्य मूलमंत्रेण सप्तवारमभिमंत्र्य चक्रमुद्रया संरक्ष्य तच्छंखस्थं जलं किंचित् कलशजले निक्षिप्य तत्कलशजलं पूर्ववत् संस्कृत्याभिमंत्र्य शंखस्थं जलं
किंचित्करेण गृहीत्वा अस्त्रमंत्रमुच्चारयन् आत्मानं यागभावं पूजोपकरणानि संप्रोक्ष्य मूलेन षडंगं विधाय गंधपुष्पाक्षतैरात्मानं सकलीकृत्य मूलमंत्रेण त्रिपुष्पां
जलिं स्वशिरसि निधाय धूपदीपौ संकल्प्य अमृततामास्थाय नैवेद्यं संकल्प्य देवतानिर्मल्यरूपः सन् मूलमंत्रं यथाशक्ति जपेत् जपं देव्यायानिवेदयेत् पुष्पादिकं आघ्रा
य कुंभोदराय नम इति वामभागे निक्षिप्य हस्तप्रक्षालनं स्थलशुद्धिं विधाय पूजामूले मंडलापकल्पणित्वानंकारायित्वा पीठं संस्थाप्य तत्स्याहृमस्तके पत्रपुष्पादिकं विधा
य पीठपूजां कुर्यात् तद्यथा देव्या दक्षिणभागे सम्मुखदेवतामर्पं स्वगुरुं गंधादिभिरभ्यर्च्य तथा गुरुपंक्तीः संपूज्य गुं गुरुभ्यः पं परमगुरुभ्यः पं परमात्म
गुरुभ्य इति देव्या वामभागे गंगणपतये दुं दुर्गायै क्षं क्षेत्रपालाय॰ इति मध्ये आधारशक्त्यै॰ कमलासनाय॰ मूलप्रकृत्यै॰ कालाग्निरुद्राय॰ महामंडूकाय॰
आदिकूर्माय॰ महावराहाय॰ अनंताय॰ भूम्यै॰ अमृतार्णवाय॰ रत्नद्वीपाय॰ हेमगिरये॰ नंदनोद्यानाय॰ मणिभूतलाय॰ रत्नमंडपाय॰ कल्पतरवे॰ रत्नासिं १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हासनाय॰ इत्युपर्युपरि पूजयेत् तदुपरि च तुरस्रं पीठं परिकल्प्य आग्नेयादि पीठकोणेषु धर्माय॰ ज्ञानाय॰ वैराग्याय॰ ऐश्वर्याय॰ पूर्वादि पीठगात्रेषु अधर्माय॰
अज्ञानाय॰ अवैराग्याय॰ अनैश्वर्याय मध्ये सं सत्वाय॰ रं रजसे॰ तं तमसे॰ मं मायायै॰ विं विद्यायै॰ पूर्वादि दिक्षु उं उड्याणपीठेश्वरसहितां उड्याणपीठेश्वर्यंबा श्री
पादुकां पूजयामि पूर्वे मां मातृकापीठेश्वरसहितां मातृकापीठेश्वर्यंबा श्री पादुकां पूजयामि आग्नेये ॐ जां जालंधरपीठेश्वरसहितां जालंधरपीठेश्वर्यंबा
श्रीपादुकां पूजयामि दक्षिणे ॐ कों कोल्लगिरिपीठेश्वरसहितां कोल्लगिरिपीठेश्वर्यंबा श्री पादुकां पूजयामि नैर्ऋत्ये ~~[illegible] ॐ पूर्णगिरिपीठाय॰ का~~
~~[illegible]~~ ॐ पूं पूर्णगिरिपीठेश्वरसहितां पूर्णगिरिपीठेश्वर्यंबा श्री पादुकां पूजयामि पश्चिमे ॐ सं संहारगिरिपीठेश्वरसहितां संहारगिरिपीठेश्वर्यं
बा श्रीपादुकां पूजयामि वायव्ये ॐ कों कोल्हागिरिपीठेश्वरसहितां कोल्हागिरिपीठेश्वर्यंबा श्रीपादुकां पूजयामि ॥ ॐ कां कामरूपपीठेश्वरसहितां
कामरूपपीठेश्वर्यंबा श्रीपादुकां पूजयामि ईशान्ये पूर्वादि दिक्षु गं गणेशाय॰ क्षं क्षेत्रपालाय॰ पां पादुकेभ्यो॰ बं बटुकेभ्यो आग्नेयादि दिक्षु जं जयायै॰
विं विजयायै॰ जं जयंत्यै॰ अं पराजितायै॰ पुनरपि ~~[illegible]~~ अग्निमुखवेतालाय॰ प्रेतवाहनवेतालाय॰ ज्वालामुखवेतालाय॰ धूम्राक्षवेतालाय॰ मध्ये कं कं
दाय॰ नं नलाय॰ दं दलेभ्यो॰ कं केसरेभ्यो कं कर्णिकायै॰ ॐ सूर्यमंडलाय॰ उं सोममंडलाय॰ रं वह्निमंडलाय॰ अं आत्मने॰ उं अंतरात्मने॰ पं परमात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शा·पं·वि·
१३

ने ॐ ज्ञानात्मने तत: पीठपंकजयोर्मध्यदेशे ॐ विं विष्णुमायायै नम: ॐ चें चेतनायै· ॐ बुं बुध्यै· ॐ निं निद्रायै· ॐ क्षुं क्षुधायै· ॐ छां छायायै· एता: षट्
पूर्वे ॐ शां शक्त्यै· ॐ तृं तृष्णायै· ॐ क्षां क्षांत्यै· ॐ जां जत्यै· ॐ लां लज्जायै· ॐ शां शांत्यै· ६ एता: षट् दक्षिणे ॐ श्रं श्रद्धायै· ॐ कां कांत्यै· २ ॐ लं लक्ष्म्यै १
ॐ धं धृत्यै· ४ ॐ वृं वृत्यै· ५ ॐ स्मृं स्मृत्यै· ६ एता: षट् पश्चिमे ॐ दं दयायै· १ ॐ निं नित्यै· २ ॐ तुं तुष्ट्यै· ३ ॐ पुं पुष्ट्यै ४ ॐ मं मातृभ्यो ५ ॐ भ्रां भ्रां
त्यै· ६ एता: षट् उत्तरे ॐ ह्रीं सर्वशक्तिकमलासनाय नम: एवं पूजिते पीठे स्वहृदयात्स्थितां मूलमंत्रमूर्तिविधारिणीं गुरुस्वरूपां ज्योतिर्मयीं सपरिवारां श्रीमहा
लक्ष्मीं चेतनानानीलभ्रुजोतिरहस्योक्तां चंडिकां ध्यात्वा दीपाद्दीपांतरमिव तन्मूर्ते: सकाशात्तां निर्गतां देवतां मूर्तिं सुषुम्नानाड्या बहिर्निर्गम्य पत्रपुष्पसहितां मं
जल्यावानीय मूलमंत्रपूर्वकं सर्वैतिपतिमिणीं ज्योतिर्मयीं सर्वपिंगलाग्निकांसपरिवारां श्रीमहालक्ष्मीमावाहयामीत्युच्चारयन् आवाहिन्या मुद्रयाकलशस्था
प्रतिमायामावाहयेत् आवाहिनी स्थापिनी सांनिधानी सांनिरोधिनी अवगुंठिनी संमुखीकरिणी प्रसाधिनीयोन्येता मुद्रा: प्रदर्शयेत् देवतामूर्ते: षडंगन्या
संकुला अष्टादशमुद्रा: प्रदर्शयेत् तत्रपाद्यार्घ्याचमनमधुपर्कादिचतारिपात्राण्यासाद्य पूर्वोक्तशंखजलेनतगंधादिभि: संस्कृत्याभिमंत्रयेत् तत्रमध्येपा
द्यपात्रं कुशाग्रातिलसर्षपयवद्वाष्टद्रव्याणि निक्षिप्य अर्घ्यपात्रे दूर्वाविष्णुक्रांता स्यामाकपद्मानि निक्षिपेत् जातीफललवंगकोललवंगान्याचमनपात्रे १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दधिमधुघृतमधुपर्कपात्रे मूलमंत्रपूर्वकं सर्वोमिरूपायै भगवत्यै महालक्ष्म्यै कल्पयामीत्युच्चारयेत् पुनराचमनीयं शुद्धजलं स्नानमंडपमानीय सुगंधतैल
पंचामृतोष्णोदकैस्तीर्थोदकैः श्रीसूक्त लक्ष्मीसूक्त दुर्गासूक्त सरस्वतीसूक्तैः स्नापयेत् पुनराचमनं दिव्यवस्त्रोपवीताभरणादीनि प्रत्येकमाचमना
दिदद्यात् ततः पादुकामुद्रया पादुकाः परिकल्प्य प्रार्थनापूर्वकं यागमंडपं देवीमानीय सिंहासने निवेश्य अष्टगंधेनापत्रपुष्पगंधहरिद्राकुंकुमसिंदूरादिना
रा नापरिमलद्रव्यैः भगवतीं संपूज्य आवरणदेवताः पूजयेत् ऐं महाकाल्यै विच्चे नमः देव्या दक्षिणे ॐ क्लीं सरस्वत्यै विच्चे • देव्यावामभागे देव्यापुरतो वामे
हूं महिषाय• दक्षिणे क्ष्रौं सिंहाय• त्रिकोणद्वारि रं नं ले पुरतः गं गणपतये• क्रूं कालाय• दक्षिणे वामे ह्रूं मृतवे• पश्चात् ह्रैं गौर्यै• ह्रैं रुद्राय• श्रीं विष्णवे• श्रीं लक्ष्म्यै•
ऐं ब्रह्मणे• ऐं सरस्वत्यै• अथ षट्दलमूले ॐ ह्रां हृदयाय• आग्नेये ॐ ह्रीं शिरसे स्वाहा ईशान्ये ॐ ह्रूं शिखायै वषट् नैर्ऋत्ये ॐ ह्रैं कवचाय हुं वायव्ये ॐ
ह्रौं नेत्रत्रयाय वौषट् पुरतः ॐ ह्रः अस्त्राय फट् दिक्षु अथ पूर्वादिदलमध्ये गुं गुरुभ्यो नमः पं परमगुरुभ्यो• पं परमेष्ठिगुरुभ्यो• हरये• हराय• गणेशाय• पुनः
पूर्वादिषट्दलमध्ये ॐ औं नंदजायै विच्चे न• ॐ ह्रौं रक्तदंतिकायै विच्चे न• ॐ क्लैं शाकंभर्यै विच्चे न• ॐ ह्रैं दुर्गायै विच्चे• ॐ ह्रूं भीमायै विच्चे• ॐ श्रीं भ्रामर्यै
विच्चे• अथाष्टदले ॐ ऐं ब्राह्म्यै• विच्चे• ॐ ह्रैं माहेश्वर्यै विच्चे• ॐ क्लीं कौमार्यै विच्चे• ॐ श्रीं वैष्णव्यै विच्चे ॐ ह्रीं वाराह्यै विच्चे• ॐ ह्रौं ह्रूं नारसिंह्यै विच्चे• ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूगृहे चतुरस्रे पूर्वादिक्रमेण

श्रा-चं-शि- क्ष्मौं नारसिंह्यै विच्चे- ॐ स्क्रौं चामुण्डायै विच्चे- दलादि पूर्वादिक्रमेण अष्टभैरवाः (ॐ लं इन्द्राय- ॐ रं अग्नये- ॐ यं यमाय) ~~(भूगृहे चतुरस्रे पूर्वादिक्रमेण)~~ १ क्षं नि
१४ र्ऋतये- वं वरुणाय- यं वायवे- सं सोमाय- ईं ईशानाय- तदग्रे(?) वज्राय- शक्तये- दंडाय- खड्गाय- पाशाय- अंकुशाय नमः गदायै- त्रिशूलाय- इत्यावरण
देवताः संपूज्य मूलेन धूपदीपनैवेद्यानि कल्पयेत् अस्त्राभिमंत्रितान्यादि(?) केन संप्रोक्ष्य कवचेनावगुंठ्य धेनुमुद्रयामृतीकृत्य गंधपुष्पाण्यभिधाय ततो मूलमंत्रमु
च्चार्य नैवेद्यं गृहाणस्वाहेति उदकं दत्वा वामहस्तेन ग्रासमुद्रां दर्शयेत् दक्षिणहस्तेन प्राणादिमुद्राः प्रदर्शयेत् करद्वयेनांगुष्ठद्वयेनानामिकाद्वयं स्पृष्ट्वा तन्मुद्रया
परिवारदेवतानां तृप्तिं विभाव्य मध्येपानीयं दत्वापोशानं हस्तप्रक्षालनार्थमुदकं श्रीखंडेन करोद्वर्तनं सकर्पूरतांबूलं समर्प्य विद्दुदीपैर्नीराजनं कर्पूरदीपैर्वि
दत्वा गीतवाद्यैः संतोष्य गंधाक्षतपुष्पयुक्तोदकं धारयन् श्रीमहालक्ष्मी मया कृतामिमां पूजां गृहाणस्वाहेति पूजां समर्प्य चतुःषष्टियोगिनीपूजां कुर्यात् इति
डामरादितंत्रसारे देवीमहोत्सवे आवरणादिपूजानाम पंचमोवसरः अथचतुःषष्टियोगिनीपूजा तद्यथा देव्याः पुरतः परितो वारकागंधेनाष्टगंधेन वा चतुःष
ष्टिकोष्ठानि संलिख्य तत्र चतुःषष्टियोगिनीनां ध्यानमुक्त्वा बाह्यपूजां कृत्वा बलिं दद्यात् प्रथमाष्टकं शुक्लवर्णां त्रिशूलडमरुपाशासिधरसर्वा
लंकारभूषितं ससैन्यं ध्यात्वा तत्र बलिं दद्यात् तत्रमंत्राः जयशुक्लवर्णे त्रिशूलडमरुपाशासिधरे सर्वालंकारभूषिते ससैन्ये एह्येहि आगच्छागच्छ १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंक्षीराग्रवालिं गृह्णाण म मे प्सि तं कुरू कुरु स्वाहा १ ॐ बीजे एह्येह्यागच्छा गच्छ गंधपुष्पाक्षित धूपदीपसहित मिमं वालिं गृह्णाण म मे प्सि तं कुरु कुरू स्वाहा
२ ॐ जयंति अंबएह्येहीति २ अपराजिते अंबएह्येहि ४ दिव्ययोगिनि अंब एह्येहि ५ महायोगीनि अंब एह्येहि ६ सिध्दयोगिनि अंबएह्येहि ७ गणेश्व
रि अंब एह्येहि ८॥ १ द्वितीयाष्टकं गौरवर्णं अक्षमालांकुशपुस्तकधरं भूषणैरलंकृतं ध्यायेत प्रेताक्षि एह्येहि १ डाकिनि अंबएह्येहि २ काल अंबएह्येहि
३ कालरात्रि अंबएह्येहि ४ निशाचारि अंबएहि ५ टंकारि अंबएहि ६ रुंड वेतालि अंबएहि ७ हुंकारि अंबएहि ८-२ तृतीयाष्टकं रक्तवर्णाकाशा स्याभय
वरदैरलंकृतं ध्याता ऊर्ध्वकेशी अंबएहि १ विरूपाक्षे अंबएहि २ शुष्कांगी अंबएहि ३ नरभोजिनि अंबएहि ४ फट्कारि एहि ५ वीरभद्रे एहि ६ धूम्रांगी
एहि ७ कलहप्रिये एह्येहि ८।३ चतुर्थाष्टकं विद्युत्संतप्ती भंधत्रबाणधनुः पात्रायुधं ध्यात्वा राक्षसि एहि १ घोररक्ताक्षि एहि २ विश्वरूपे एहि ३ अभयंक
रि एहि ४ कौमारिके एहि ५ चंडिके एहि ६ वाराही एहि ७ मुंडधारिणी एहि ८।४ पंचमाष्टकं रक्तोत्पलवर्णं सिरुणादिस संकाशांकमलाक्षमाकमलाभयव
रदं ध्यात्वा भैरवी अंब एहि १ चाक्रिणि एहि २ कंकाली एहि ३ भुवनेश्वरि एहि ४ त्रोहिके एहि ५ महामारि अंबएहि ६ यमदूति एहि ७ करालिनि एहि ८।५ षष्ठाष्टकं सुनी
लं शंखचक्रगदाधरं ध्यात्वा कालि अंबएहि १ धूम्राक्षि एहि २ प्रेतवाहिनि एहि ३ ध्वांक्षि एहि ४ खड्‌गिनि एहि ५ दीर्घलंबोष्ठि एहि ६ मंबालिनि एहि ७ मंत्रयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिविनि एहि ॥ ६ ॥ सप्तमाष्टकं तेजःपुंजाभिभं खड्गखेटकपरीक्षुहस्तं ध्यायेत् कोशीनि एहि १ गर्द्धिनि एहि २ रोमजंघे एहि ३ वारिणि एहि ४ विशालाक्षि एहि ५
कार्मुके एहि ६ लोपाक्षि एहि ७ अधोमुखि एहि ॥ ७ ॥ अष्टमाष्टकं धूम्रवर्णं खड्गखेटकपरिघभिंडिमालाधरं ध्यायेत् मुंडाग्रधारिणि एहि १ व्याघ्रि
एहि २ कांक्षिणि एहि ३ प्रेतरूपिणि एहि ४ धूर्जटि एहि ५ घोरि एहि ६ कराक्षि एहि ७ विषलंबि एहि ॥ ८ ॥ इति चतुःषष्टिक्रमः ततः देव्याः पुरतः ग
णपति भैरव पादुक बलिं दद्यात् गं गणपते एहि ॐ भैरव एहि ॐ देवीपुत्र अंकुश बटुकनाथ पिंगदभासुरनेत्र एह्येहि आगच्छ आगच्छ गंधपुष्पाक्षतधू
पदीपसहितमिमं क्षीरान्नबलिं गृहाण रक्षरक्षक द्न ॰ २ ह्रां ह्रीं ह्रूं स्वाहा अनेनमंत्रेण बटुकाय बलिं दद्यात् ततः क्षेत्रपाल बलिं दद्यात् पंचप्रणव
मुच्चार्य पश्चादन्नं समुध्धरेत् सर्वपीठोपपीठादि द्वारोपस्तरणा निच क्षेत्रक्षेत्रज्ञ संदोह सर्वे दिग्भाग संस्थिताः योगिनीयोगवीरेंद्रः सर्वेतित्रेन-
यागताः सिद्धपुत्रक आचार्यः सर्वेतत्रान्नकांक्षिणः नगरेवाथवाग्रामे अटव्यां सरितस्तटे वापिकूपे च वृक्षे च स्मशाने मातृमंडले नानारूपधरा
ये च बहुरूपधरा आपि तेसर्वे चैव संतुष्टा बलिं गृह्णंतु मे सदा शरणागतोस्म्यहं तेषां ते सर्वे मम सुप्रदाः बलिभुखादि संतुष्टा ददातु मम चिंतितं सर्व
कार्याणि कुर्वंतु दोषांश्च घ्नंतु मे सदा इदं बलिदानं प्रस्थमपक्ष्यां वा अर्धरात्रौ कार्यं इति डामरादि तंत्रसारे देवीमहोत्सवे चतुःषष्टियोगिनी बलिपू ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जा विधिनमिषष्ठो वसर ः॥ ६॥ अथकुमारीपूजा विधिं वक्ष्यते द्विवर्षादियुक्तां अरोगिणीं सुरूपां पुष्टांगीं समान वंशजां कन्यां पूजयेत् कामनाविशे
षेतु सर्वकार्येषु ब्राह्मणीं जयार्थे क्षत्रियां लाभार्थे वैश्यां सुसुतार्थे शूद्रजां दारुणे सजा काम्यापूजा नवरात्रे एका नव वा एको त्तर वृध्या द्वित्रे वृध्या
वापूज्या नित्यं चंड्यादौ ततात्प्रोक्त संख्यया पूजयेत् सुविताने शुभे स्थाने पीठे कुमारीं संस्थाप्य पूजयेत् मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं
नवदुर्गात्मिकां साक्षात्कन्या मावाहयाम्यहं इति मंत्रेण प्रथमदिने कुमारीमामंत्र्य उष्णोदकेन तस्याश्चरणौ प्रक्षाल्य अभ्यंगं कारयित्वा वस्त्रालंकाराणि द
त्वा स्वयमुपाविश्य षडंगं न्यस्य कुमारीं महादेवीस्वरूपिणीं ध्यात्वा तस्या दक्षिणे ब्रह्मचारिणं वामे अनुपनीतमुपवेश्य तयोः गणपति बटुक भैरवा
वाह्य सर्वेषां गंधपुष्पधूपदीपैर्नैवेद्य फलैः पंचखाद्यैश्च तांबूल नीराजनैः संपूज्य जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि पूजां गृहाण कौमारीजग
न्मातर्नमोस्तु ते इति प्रतिपदि मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं १ आवाहनमंत्रः त्रिपुरां त्रिगुणां धा
त्रीं मार्गज्ञानस्वरूपिणीं त्रैलोक्य वंदितां देवीं त्रिपुरां पूजयाम्यहं इति द्वितीयायां कालिकां तु कल्लातीतां कारुण्य वद नांहीवां कल्याणजननीं नित्यां
कन्यामावाहयाम्यहं इति तृतीयायां आणिमादि गुणोदारां मकाराद्यक्षरात्मिकां अनंतशक्तिकां लक्ष्मीं कामाक्षीं पूजयाम्यहं इति चतुर्थ्यां कामचारीं महा
कायां कारुण्यहृदयां शिवां कामदां करुणोदारां गायत्रीं पूज० इति पंचम्यां चंडवीरां चंडमायां चंडमुंडप्रभंजिनीं तां नमामि च देवेशीं चंडिकां पूजयाम्यहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श-चं-वि- इति षष्ठ्यां सुरानंदकरीं शांतां सर्वदेवनमस्कृतां सर्वभूतात्मिकां देवीं शांभवीं पूजया· इति सप्तम्यां सुंदरीं सर्ववर्णांगीं सुरवसौभाग्यदायिनीं संतोषजन
३६ नीं देवीं सुभद्रां पूजया॰ इति अष्टम्यां दुर्गमे दुस्तरे कार्ये भयशोकविनाशिनीं पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिहारिणीं इति नवम्यां इति प्रातिपदादिनव
तिथिषु यथाक्रमं पूजयेत् इति कुमारीपूजा अथ ब्राह्मणसुवासिनीपूजां कुर्यात् नवरात्रे नित्यचंडीपूजा नवदुर्गाकालरात्रिपूजासु प्रतिदिनमेककु
मारी नव ब्राह्मणसुवासिन्यः नवचंडीपूजायां प्रतिदिनमेकोत्तरवृध्या कुमारी ब्राह्मणसुवासिन्यः शतचंडीपूजायां दिनचतुष्टयं प्रत्यहं दशोत्तरवृध्या कु
मारी ब्राह्मणसुवासिन्यः सहस्रचंड्यां शतोत्तरवृध्या कुमारी ब्राह्मणसुवासिन्यः एवं कुलाजपं कुर्यात् पूर्वोक्तान् सकलान् न्यासान् विन्यस्य देवीं ध्यात्वा प्रधा
नायुधमुद्रां प्रदर्शयित्वा नवाक्षरमंत्रं शतवारं जपित्वा कवचार्गलाकीलकपूर्वकं सप्तशतीजपं सरहस्यं जप्त्वा पुनरपि नवाक्षरमंत्रं शतवारं जपेत् प्रदक्षिणनमस्कारा
न्कृत्वा ब्राह्मणसुवासिनीभोजनं कुर्यात् स्वयमेव तथैवानियमेन भुंजीयात् नवरात्रे तु उपोषणमयाचितं नक्तं एकभक्तं वा कुर्यात् विशेषस्तु उपोषणं नक्तं वा किंच
नवरात्रोद्देवपूजा रात्रावेव कुर्यादिति सिद्धं आश्विनशुक्लप्रतिपदामारभ्य नवमीपर्यंतं नवरात्रः यदा कदाचित् कुमेमासि शुक्लचतुर्दशीमारभ्य पुनः शुक्ल
चतुर्दशीपर्यंतं त्रिंशद्दिनावधि नित्यचंडी तथैव शुक्लषष्ठीमारभ्य शुक्लचतुर्दशीपर्यंतं नवदिनात्मका नवदुर्गा तथैव कृष्णाष्टमीमारभ्य कृष्णचतुर्दशी
पर्यंतं नवदिनात्मककालरात्रिः एतासु चतुर्षु प्रत्यहं एकावृत्तिसप्तशतीजपः आश्विनशुक्लप्रतिपदामारभ्य शुक्लनवमीपर्यंतं नवदिनात्मकं नवचंडी तत्र प्र
त्यहमेकोत्तरवृध्या जपः यदा कदाचित् महाकार्ये शुभकाले चतुर्दिनात्मिका शतचंडी तत्र ब्राह्मणैः प्रथमेह्नि प्रत्येकं सकृत् द्वितीयदिने द्विरावृत्तिः तृ ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ती य दि ने प्रसेकं त्रिरावृत्तिः चतुर्थदिवसे प्रसेकं च-४ सर्वमिलित्वा सहस्रावृत्तिजपः कार्यः पूजाद्रव्याणि प्रसहं अनुलेपन फलद्व्यादिव्यवस्त्रत्रयं प
चविंशति सहस्रं पुष्पाणि फलद्वयं गुग्गुल विंशति दीपाः कुंड पद्द्यं ह्याविध्याग्नं एवं प्रसहं प्रथमे हि एकगुणं द्वितीये २ तृतीये ३ चतुर्थे चतुर्गुणं कुर्या
त् सहस्रचंड्यामेतद्द्विगुणं प्रथमे प्रहरं द्वितीये २ तृतीये ३ चतुर्थे प्रहरं चतुष्टयं जागरणं कुर्यात् जपसमाप्तौ होमः नवरात्रा अष्टमी पर्यंतं जपं कृत्वा
नवमी दिन पर्यंतं जपो वा अष्टम्यां कृत्वा समाप्य तस्यामेव होमारंभं कृत्वा नवम्यां समापयेत् विस चंडीनवदुर्गा कालरात्रीणां चतुर्दश्यामेव होमः शतचं
ड्यां सहस्रचंड्यां वा पंचमे हीने होमः इति डामरादि तंत्रसारे देवीमहोत्सवे कुमारीपूजाविधिनामि सप्तमोवसरः ॥ ७ ॥ अथ होमविधिः आचम्य प्राणाना
यम्य देहीकेन सह आत्मना ब्राह्मणैश्च कृत्वा चंडीजपसंपूर्णता सिध्यर्थममाभीष्टसिध्यर्थं उक्तद्रव्यैरमुकसंख्याकैर्होमं करिष्य इति संकल्प्य विध्युक्तमा
र्गेण कृतस्य कुंडस्य संस्कारं कुर्यात् मूलमंत्रेण कुंडं वीक्ष्य अस्त्रमंत्रेण संप्रोक्ष्य तेनैव दर्भैः संताड्य कवचेनाभ्युक्ष्य अन्यानि सर्वाणि सामिधः स्या
द्दशांगुलाः दूर्वात्रियं समुद्दिष्टं गुडूचीचतुरंगुला व्रीहिमाषाश्च मुद्गाश्च कोद्रवा मुष्टिमात्रकाः गोधूमानां शतं विंध्यात्तंडुलाश्च तथाविधाः चंदनागरू
कर्पूर कस्तूरीकुंकुमानि च तिलतिंडीबीजभानानि निशागंधाणमात्रकाः शालिकासर्षपास्तद्वत् तु चारबीजादिकं तथा वर्षैके गुग्गुलेमित्री कूष्मांडाश्च
समात्रकाः गुंजाप्रमाणं लवणं मरीचान्यपि विंशति अथाश्वनामानि शालिग्रामानां च पूजनं प्रथमो भत्स्यरूपी च द्वितीयः कूर्मनामकः तृतीयस्तु व
राहश्च चतुर्थो नरहरिस्मृतः पंचमो वामनश्चैव षष्ठो भार्गवसंज्ञकः सप्तमो रामभद्रश्च देवकीनंदनोष्टमः नारायणस्तु नवमो न वनारायणस्मृताः ईते

वांपङ्जेनतुष्टानवसुस्तज्जनार्दनाः। प्रतिपत्प्रभृतिश्रेष्ठे हयवध्धेस्तुपन्ननं स्नापयित्वानदीतोये गंधधूपैः सुधूपयेत् उच्चैश्रवाहयश्चाद्यो
श्री द्वितीयोमेघपुष्पकः तृतीयः क्षेमकृच्छ्वाञ्जीचतुर्थोराजहंसकः सर्वसौख्यप्रदःश्रेष्ठः पंचमोमकरालयः षष्ठः सुलोचनोवाहः सप्तमोगंध
मरावृयध्वज अष्टमः कालकेशश्चनवमः सिद्धिदायकः एतेषुपूजितेष्वेवंपूजितास्युःसुरोत्तमाः दधिक्राव्णेनमंत्रेणहयपूजाविधिस्मृतः
एवंकृतेविधानेतुराजाकृत्वातुआगरः गीतवादित्रघोषैश्चस्तोत्रैर्दिव्यामनोरमैः ततस्तुनवमींप्राप्यकुर्यात्स्थंडिलमुत्तमं अथमु
द्रालक्षणानि हस्ताभ्यामंजलिंकृत्वानामिकामूलपर्वणि अंगुष्ठौनिक्षिपेत्सेयंमुद्रावाहिनास्मृता अधोमुखीत्वियंचेत्स्यात्
स्थापनीमुद्रिकामता उच्छ्रितांगुष्ठमुष्ट्योस्तुसंयोगात्संनिधापनी अंतःप्रवेशितांगुष्ठासैवसंरोधिनीमता मुष्टिद्वयस्थितांगुष्ठौसंमु
खौचपरस्परं संश्लिष्टावुच्छ्रितौकुर्यात्सेयंसंमुखमुद्रिका प्रसृतांगुलिकौहस्तौमिथःश्लिष्टौचसंमुखौ ८ कुर्यात्स्वहृदयेदेशेमुद्राप्रार्थन
संज्ञका अंगुष्ठतर्जन्यग्रेतुग्रंथयित्वांगुलित्रयं प्रसारयेदक्षमालामुद्रेयंपरिकीर्तिता प्रसारयेदुभौहस्तौहृद्देशेतुनियामितौ अंगुल्यो
विततःकार्यामध्येंगुष्ठद्वयंन्यसेत् शिवस्यासनविन्यासांपद्ममुद्रांप्रदर्शयेत् करौतुसंहतौकृत्वासंमुखावुन्नतांगुली ललाटमीलि ६०
तांगुष्ठौकुर्यादेषांजमुद्रिका दक्षमुष्टिस्थतर्जन्यादीर्घयाबाणमुद्रिका कनिष्ठानामिकेबध्वास्वांगुष्ठेनेवम[illegible]तः शिष्टांगुलीत्प्र
वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृते संसृष्टे खड्गमुद्रिका वज्रमुद्राप्रवक्ष्यामिसांनिध्यकरिणींपरां पद्माकारोकरोकृत्वा अग्रदेशेचमध्यमे अंगुल्यौधारयेत्प्राज्ञ श्रियंलक्ष्मीति
साधयेत् अनयाद्दष्टयाचैव महालक्ष्म्याः प्रियोभवेत् अन्योन्यविमुखौहस्तौकृत्वातुग्रंथितांगुली अंगुल्यौमध्यमेभूयः संलग्नौसुप्रकारितौ कनि
ष्ठांगुष्ठकौलग्नौमुद्राचक्रस्यसिध्धिदा अंगुष्ठेनकनिष्ठांतुबध्वाशिष्टांगुलित्रयं प्रासारयेत्त्रिशूलस्यमुद्रेयंपरिकीर्तिता तलेतलंतुकरयोस्ति
र्यक्संयोज्यचांगुलीः संहताःप्रसृताकुर्यान्मुद्रेयंपरशोर्मता वामांगुष्ठंतुसंगृह्यदक्षिणेनतुमुष्टिना कृत्वोत्तानंतथामुष्टिमंगुष्ठंतुप्रसारयेत् दक्षि
णांगुष्ठसंस्पृष्टामुद्राशंखस्यचोदिता वाममुष्टचूर्ध्वांगुष्ठाघंटा वाममुष्टिस्थतर्जन्यादक्षमुष्टिस्थतर्जनीं संयोज्यांगुष्ठकाग्राभ्यांतर्जन्यग्रे
स्वकेक्षिपेत् एषापाशाव्हयामुद्राविद्वद्भिःपरिकीर्तिता अथअश्वत्थसमिधमूलेनप्रागग्राउदगग्रास्तिस्रस्तिस्रोरखाहृदयमंत्रेणलिखेत्
तत्रप्रागग्ररेखासुमुकुंदेशपुरंदराअभ्यर्च उदगग्ररेखासुब्रह्मवैवस्वतेंदूनभ्यर्च अथतत्रत्रिकोणंषट्कोणंवृत्तंअष्टकोणंचतुरस्रत्रयंलि
खेत् मूलेनसर्वमभ्युक्ष्यकुंडंपूजयेत् तत्रवैश्वानरयोगपीठंआधारादिज्ञानापर्यंतपूजयेत् वैश्वानरनवशक्तयोयथा पीतायै॰ श्वेतायै॰
अरुणायै॰ कृष्णायै॰ धूम्रायै॰ तीव्रायै॰ स्फुलिंगिन्यै॰ रुचिरायै॰ इतिपूर्वादिमध्येज्वालिन्यै॰ इतिपीठंसंपूज्य तत्रवागीश्वरीमृतुस्नातां
नीलेंदीवरसंनिभां वागीश्वरणसंयुक्तामुपचारैःप्रपूजयेत् सूर्यकांतादिसंभूतंयद्वाश्रोत्रियगेहजं आनीयचाग्निंपात्रेणक्रव्यादांशंप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं॰ वि॰
१८

रिसजेत्॥ तमग्निं वीक्षणादि-चतुर्भिः संस्कारैः संस्कृत्य औदर्यं वैद्याग्निभ्यामेकीकृत्य वह्निबीजेन चैतन्यं जनयन्॥ तद्यथा॥ वामनाड्या प्रा
णपूरण पूर्वकं मायाबीजेन संहारमुद्रया तमग्निमंतः समाकृष्य भ्रुवोर्मध्ये बिंदुसंमध्ये नाभिजठराग्निनाचैकीकृत्य उद्भवमुद्रया मायाबीजेन पिंगलया रे
चयेत्॥ ॐ ह्रीं वह्निचैतन्याय नमः॥ इत्यनेन मंत्रेण बहिस्थितस्याग्नेश्चैतन्यं जनयेत्॥ ततो मूलेनाभिमंत्र्य॥ धेनुमुद्रयामृतीकृत्य॥
अस्त्रेण संरक्ष्य कवचेनावगुंठ्य गंधादिभिरभ्यर्च्य कुंभस्योपरि त्रिपरिभ्राम्य भूपिष्ठजानुकः मूलमंत्रपूर्वकं आत्माभि
मुखं वह्निं शिवबीजपियारित्याग्नौ क्षिपेत्॥ पश्चाद्देवस्य दक्षिणपार्श्वे आचमनादिकं कुर्यात्॥ ॐ चित्पिंगल हन हन दह दह
पच पच सर्वज्ञाज्ञापय स्वाहा॥ अनेन मंत्रेण ज्वालिनीमुद्रां प्रदर्श्य गर्भसंरक्षणार्थं समिधनैरारध्य॥ मूलमंत्रेण दर्भहस्तो दर्भकं
कणं बद्ध्वा गर्भाधानादिसंस्कारान् कुर्यात्॥ तद्यथा॥ मूलेन घृताहुतित्रयं जुहुयात्॥ देव्या दोहद इति प्रार्थ्य ततो मूलेनाभि
मंत्रयेत्॥ ततः गर्भाधानाय स्वाहा। पुंसवनाय॰। सीमंतोन्नयनाय॰। अनवलोभनाय॰। प्रत्येकं घृताहुतित्रयं जुहुयात्॥
कुसुमादिदीप्सितफलस्वादानानि कल्पयेत्॥ ततो गर्भनिःक्रमणं विधाय जातकर्माद्युद्देति पूर्ववज्जुहुयात्॥ त
तः शतमंगलनामास्तित्वं हुताशनेति नाम कृत्वा अन्नप्राशनादि विवाहांतानि दशकर्माणि कुर्यात्॥ नामकरणाय॰ १८

निष्क्रमणाय॰ अन्नप्राशनाय॰ चौलाय॰ उपनयनाय॰ महानाम्नीव्रताय॰ महाव्रताय॰ उपनिषद्व्रताय॰ गोदानाय॰ समावर्तनाय॰ उद्वाह
य॰ प्रसेकं पूर्ववज्जुहुयात् ॥ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं ॥ सुवर्णवर्णममलं समिद्धं विश्वतो मुखं ॥ अनेन मंत्रेण अ
ग्निं पूजयेत् ॥ अथ स्वदेहे वन्हेर्जिव्हान्यासं कुर्यात् ॥ तद्यथा ॥ ॐ स्यूं पद्मचांगारा राजसी अग्निजिव्हायै॰ मुखे ॥ ॐ ल्यूं श्वेतराजसी
अग्निजि॰ नासिकायां ॥ ॐ घूं धूमिनी राजसी अग्नि॰ नेत्रयोः ॥ ॐ घ्रूं करालिका राजसी अग्नि॰ व्यापकं ॥ ॐ सहस्रार्चिषे॰ हृदया
य॰ । ॐ स्वस्तिपूर्णाय॰ शिरसे स्वाहा ॥ ॐ उत्तिष्ठपुरुषाय॰ शिखायै वं॰ ॥ ॐ धूम्रव्यापिने॰ कवचाय हुं ॥ ॐ सप्तजिव्हा
य॰ नेत्रत्रयाय वौषट् ॥ ॐ धनुर्धराय॰ अस्त्राय फट् ॥ इति षडंगः ॥ अथाष्टमूर्तिन्यासः ॥ अग्नये जातवेदसे अग्निमूर्त
ये नमः ॥ मूर्ध्नि ॥ ॐ अग्नये सप्तजिव्हायाग्निमूर्तये नमः । दक्षिणपार्श्वे ॥ ॐ अग्नये हव्य॰ दक्षिणकट्यां । ॐ अग्नये अश्वोद
रायाग्नि॰ लिंगे ॥ ॐ अग्नये वैश्वानरायाग्नि॰ वामकट्यां ॥ ॐ अग्नये कौमारतेजसेग्नि॰ वामपार्श्वे ॥ ॐ अग्नये विश्वमुखायाग्नि
मू॰ वामांसे ॥ ॐ अग्नये देवमुखायाग्नि॰ शिखायां ॥ इष्टाशक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंजपाभं हेमाकल्पं पद्म
संस्थं त्रिनेत्रं ध्यायेद्वन्हिं बद्धमौलिं जटाभिः ॥ इति ध्यात्वा ॥ ततो दक्षोर्ध्वमेखलायां परिषिच्य मध्यमेखलायां दर्भैः परि
स्तीर्य ॥ तृतीयमेखलायां परिधीन्निधाय ॥ त्रिसृषु मेखलासु ब्रह्माविष्णुमहेश्वरान्संपूज्य ॥ वैश्वानरमंत्र भृगुर्येन
रो गायत्री ॥ रं बीजं स्वाहा शक्तिः होमे विनियोगः ॥ ॐ वैश्वानर जातवेद सद्दहाव लोहिताक्ष सर्वकर्माणि साधय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा॥ अनेनवन्हिं गंधादिभिरभ्यर्च्यमंत्रपूजांकुर्यात्॥ यथा॥ ॐ स्यूंप मरागायै॰ अग्निजिव्हायै॰ ॐ ध्रूं सुवर्णायै॰
अग्नि॰ नैर्ऋत्ये ॐ श्र्यूं भद्रलोहितायै॰ अग्नि॰ वायव्ये ॐ व्यूं लोहितायै॰ अग्नि॰ ईशान्ये ॐ ल्यूं श्वेतायै॰ अग्नि॰ प
श्चिमे ॐ ग्रूं धूम्रिन्यै॰ अग्नि॰ पूर्वे ॐ पूं कालिकायै॰ अग्निमध्ये॥ सहस्रार्चिषे आग्नेये॰ स्वस्तिपूर्णाय॰ नैर्ऋत्ये ॐ
उत्तिष्ठपुरुषाय॰ वायव्ये ॐ धूमव्यापिने॰ ईशान्ये ॐ स्वस्तिजिव्हाय॰ पश्चिमे ॐ धनुर्धराय॰ पूर्वे ॐ अग्नयेजातवे
दसेनमः पूर्वे ॐ अग्नयेसप्तजिव्हाय॰ आग्नेये ॐ अग्नयेहव्यवाहनाय॰ दक्षिणे ॐ अग्नयेअश्वोदरेय॰ नैर्ऋत्ये ॐ अग्नये
वैश्वानराय॰ पश्चिमे ॐ अग्नयेकौमारतेजसे॰ वायव्ये ॐ अग्नयेविश्वमुखाय॰ उत्तरे ॐ अग्नयेदेवमुखाय॰ ईशान्ये॥ इस
सदलेषु॥ चतुरस्त्रे इंद्रादिलोकपालान्सायुधान् दिक्षुपूजयेत्॥ अथपात्रासादनं॥ ॥ ब्रह्माणंदक्षिणेउपवेश्य
देशिकः कुंडंनवस्त्रेणसंवेष्ट्य॥ कुंडादुत्तरतः प्रणीतामुदकपूर्णांनिधाय॥ प्रणीतावैश्वानरमध्येप्रोक्षणपात्रंनि
धाय॥ प्रणीतोदकेनोपूर्य प्रणीतापात्रात्पूर्वतः पात्राण्यासादयेत्॥ क्रमेण आज्यस्थाली चरुस्थाली गव्यक्षीरं स्रुक्
स्रुवौघृतं तंडुला कुशापूलकांपालाशसमिधस्तिस्त्रः॥ अतः परं पूर्णपात्रं॥ ततः सप्तद्वीपेश्वरीं ध्यात्वा॥ ॥ वरुण
बीजमुच्चरन् कुशाफूलं प्रोक्षणीपात्रेनिक्षिप्य प्रोक्षणीपात्रस्थोदकेनकुशफूलके सर्वाणिपात्राणिप्रोक्षयेत् ततः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आज्यपात्रेघृतंनिधाय चरुस्थाल्यांतंडुलान्निक्षिपेत् ॥ ततोघृतमग्नावधिश्रपणं कृत्वा ॥ उदगासनाग्नेः प्रदक्षिणमानीय कुंडाचा
र्यमध्ये मायाबीजमुच्चार्य स्थापयेत् ॥ धेनुमुद्रां प्रदर्श्य ॥ अग्नौ चरुस्थालीमारोप्याधः सिद्धे पायसे दर्भसाहितेन पलाशसमिधो
ग्रेण ३ दकेनु घृतपायसयोः प्रदक्षिणावर्तेन भ्रमणमुल्मुकेन सोज्वलेनाग्नेः कुर्यात् ॥ स्रुक्स्रुवौ प्रताप्य प्रणीतोदकेनासिच्य पुनः प्रता
प्य दक्षिणे स्थापयेत् ॥ ततः चरुमाज्येनाभिघार्याग्नेः प्राग्दक्षिण्ये नाग्नेर्वायव्ये संस्थाप्य स्वबीजेन संस्कृत्य धेनुमुद्रां प्रदर्श्य ततः
शिष्टमोनीतिस्वः समिधो वन्हौ निक्षिपेत् ॥ प्रोक्षणीपात्रस्थोदकेन कुशमूलकेन प्रदक्षिणं अग्निं पर्युक्ष्य प्रणीतायां कुशपूलकं
निक्षिपेत् ॥ जानुं भूमौ निधाय मुखेन धमयेत् ॥ इति पात्रासाद[illegible]नं ॥ ॥ अथ होमः ॥ आज्ये प्रादेशमात्रौ द्वौ दर्भौ निक्षि
प्य वामभागे इडांनाडीं दक्षिणभागे पिंगलां मध्ये सुषुम्नां ध्यात्वा ॥ स्रुवेण दक्षिणभागादाज्यं गृहीत्वा अग्नये स्वाहेत्यग्ने
र्दक्षिणलोचने जुहुयात् ॥ वामभागादाज्येन सोमाय स्वाहेति वामलोचने जुहुयात् ॥ पुनरपि स्रुवेण वामभागादाज्यं गृहीत्वा अ
ग्नीषोमाभ्यां स्वाहेत्यग्नेर्भाललोचने जुहुयात् ॥ पुनर्दक्षिणभागादाज्यं गृहीत्वा अग्नये स्विष्टकृते स्वाहेति तन्मुखे जुहुयात्
सर्वे मंत्रा हृन्मंत्रेण सह योजयेत् ॥ ततः सताराभिर्व्याहृतिभिराज्येन जुहुयात् ॥ ततः स्रुवेणाज्यं गृहीत्वा जिह्वांगमूर्तिमंत्रैः प्रत्येकं ए
कैकामाहुतिं जुहुयात् ॥ यथा सहस्रपद्मरागायै अग्निजिह्वायै इति सप्तजिह्वामंत्रैर्जुहुयात् ॥ ततः अग्नये जातवेदसे स्वाहेत्यष्टमू
र्तिमंत्रैर्जुहुयात् ॥ अथाधिदेवताः ॥ अमर्येभ्यः स्वाहा पितृभ्यः स्वाहा पशुभ्यः० नागेभ्यः० पिशाचेभ्यः० ततः स्रुवेणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं॰ वि॰ ॐ पंचतुर्व्यारंग ह्रीं सौ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा वौषडिति जुहुयात् ॥ अथ होमस्य निर्विघ्नतासिध्य

२० र्थं विघ्नेश्वर मंत्रेण दश आहुतिर्जुहुयात् ॥ ● सप्तिमुखं ॥ अथ प्रधानहोमः ॥ पूर्वोक्तान्सकलान्न्यासान् विन्यस्य देवीं ध्यात्वा ॥ ततः वन्हौ देवतापीठं स्वमभ्यर्च्य ॥ तत्र पुष्पसहितां देवीं नासामार्गेणावाह्य आवाहनादि मुद्राः प्रदर्श्य पाद्याद्यु

पचारानुपरिकल्प्य वन्हिदेवतात्मैक्यं भावयेत् ॥ तद्यथा ॥ मूलमंत्रेण पंचविंशति घृताहुतीस्तन्मुखे जुहुयात् ॥ तत

नाडीसंधानार्थं मूलेन दश आज्याहुतीर्जुहुयात् ॥ चंडीजपदशांशेन कवचार्गलाकीलकपूर्वकां सप्तशतीं सरहस्यां प्रति

श्लोकेनोक्तद्रव्यैर्यथापायसाज्यतिलैर्जुहुयात् ॥ प्रसध्याये पूर्वे रुवाचस्थले पत्रपुष्पैर्जुहुयात् ॥ अथवा नमो देव्या

इति स्तोत्रमंत्रेण जपदशांशं जुहुयात् ॥ तासां नामानि यथा ॥ कादंबर्यै नमः स्वाहा ॥ उल्कायै॰ करालायै॰ रक्ताक्ष्यै॰

श्वेतकोटर्यै॰ हरितायै॰ प्रक्षिण्यै॰ कंकायै॰ सुरश्रेष्ठायै॰ सर्वराज्यै नमः स्वाहा ॥ इति दिग्देव्यः ॥ ब्राह्म्यै॰ माहेश्वर्यै॰ कौ

मार्यै॰ वैष्णव्यै॰ वाराह्यै॰ माहेन्द्र्यै॰ नारसिंह्यै॰ चामुंडायै॰ इति द्वारपालाः ॥ धात्रे॰ विधात्रे॰ शंखनिधये॰ पद्मनि

धये॰ द्वारश्रियै॰ वास्तुपुरुषाय॰ इति द्वारदेवताः ॥ ऐरावताय॰ पुंडरीकाय॰ वामनाय॰ कुमुदाय॰ अंजनाय॰ सार्व

भौमाय॰ सुप्रतीकाय॰ पुष्पदंताय॰ इति दिग्गजाः ॥ दमकाय॰ पुंडरीकाय॰ गुग्गुलाय॰ करंडकाय॰ इति लक्ष्मीगजाः ॥ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋग्वेदाय० यजुर्वेदाय० सामवेदाय० अथर्वणवेदाय० सूर्याय० चंद्राय० अंगारकाय० बुधाय० ब्रहस्पतये० शुक्राय० श
नैश्चराय० राहवे० केतवे० इतिनवग्रहाः॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० कुबेराय० ईशानाय०
भूम्यै० अंतरिक्षाय० इतिलोकपालाः॥ असितांगभैरवाय० रुरुभैरवाय० चंडभै० क्रोधभै० उन्मत्तभै० कपालभै० भी
षणभै० संहारभैरवाय० इत्यष्टभैरवाः॥ आधारशक्त्यादि पीठदेवताः बीजयुक्त नाममंत्रैः जुहुयात्॥ श्रीमहालक्ष्मी
महाकाली महासरस्वत्यादिसमस्त आवरणदेवताः सबीजकाखान्नाम मंत्रैर्जुहुयात्॥ एतां सांनिध्यं चंडी होमे एकै
कदेवतायाः प्रत्येकं त्रिंशदाद्याहुती जुहुयात्॥ नवरात्रिनवदुर्गा कालरात्रिहोमे एकैकदेवतायादशाहुतीर्जुहुयात्।
शतचंडीहोमे एकैकदेवतायाः प्रत्येकं शतंजुहुयात्॥ इतिआमरोक्तं॥ अथास्विष्टकृतं॥ ॐ ह्रीं ब्रह्माणीमाहेश्वरीकौ
मारी वैष्णवीवाराही नारसिंही ऐं ह्रीं चामुंडायैविच्चे स्विष्टकृतेस्वाहा॥ ततः नवाज्याहुतीर्जुहुयात्॥ ॐ ह्रीं नंदायैविच्चे
स्वाहा॥ ॐ ह्रीं रक्तदंतिकायैविच्चे० ॐ ह्रीं शाकंभर्यैविच्चे० ॐ ह्रीं दुर्गायैविच्चे० ॐ ह्रीं भीमायैविच्चे० ॐ ह्रीं भ्रामर्यैविच्चे०
ॐ ह्रीं कालिकायैविच्चे० ॐ ह्रीं शिवदूत्यैविच्चे० ॐ ह्रीं प्राजापत्यैविच्चे०॥ ततोवस्त्राभरणगंधपुष्पाक्षतपरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं॰वि॰ मलनानाफलखाद्यभक्ष्योपेतां स्रुवेणनवाक्षरावच्छिन्नधारयान्नस गीतवाद्यघोषैश्च पूर्णाहुतिं जुहुयात् ॥ अनंतरं ॥ तस्माद्यज्ञा
२१ सुसंपूज्य यज्ञात्मनो ब्रह्मरूपिणः ॥ संस्थाव्य पुरोडाशं प्राश्यामि सुखपुण्यदमिति शक्रादयः सुरगणा इति नमो देव्यै
महादेव्यै इति देव्याहतेतत्रमहासुरेंद्र इति चतुर्भिश्चंडिकास्तवैरपि मार्जयेत् ॥ ततो गंधपुष्पाक्षतैर्वन्हिमभ्यर्च्य ॥
होमं देव्यै समर्प्य नीचीमार्गेण देवीं पीठे संभाव्य गंधपुष्पधूपदीपनैवेद्यछत्रचामरव्यंजनआंदोलनेनृत्यगीतवा
द्यैः समस्तराजोपचारैः संपूज्य ॥ खड्गिनी शूलिनी घोरेति प्रथमचरितश्लोकेन ॥ शूलेन पाहि नो देवीति मध्यमच
रितश्लोकचतुष्टयेन ॥ सर्वस्वरूपे सर्वेशे इत्युत्तमचरितश्लोकपंचकेन नमस्कारान्कुर्यात् ॥ सर्वस्वरूप इति पंचश्लोकै
स्तोत्रं कुर्यात् ॥ द्रव्यहीनमिति देव्याः पूजासमर्पणं कुर्यात् कृत्वा ॥ आचार्यर्त्विजः पूजयेत् ॥ आचार्याय चतुर्विंश
तिहेमनिष्काणि अष्टौ गोमिथुनानि दद्यात् ॥ ब्रह्मणे निष्कषट्कं गोमिथुनद्वयं च दद्यात् ॥ ऋत्विग्भ्यो निष्कत्रयं
एकं गोमिथुनं च दद्यात् ॥ इदं शतचंडीविधाने एतद्दानं चंडीविधीयते ॥ तद्दानं वदुर्गाकालरात्रिविधा
ने ॥ अथवाऽशक्तपक्षे सुवर्णनिष्कं दद्यात् ॥ ततः श्रेयः संपादनं ब्राह्मणेभ्यो गृह्णीयात् ॥ स्वासनोपविष्टं शांतं
सपत्नीकं पुत्रसहितं यजमानमानीय आचार्यादिकऋत्विज दूर्वासुगंधदधिकुसुमाक्षतसहिताश्चतुर्भिश्चंडिकास्तवै २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राशीर्वाहान्दद्युः ॥ अविधवानारीवर्गो यजमानं सपत्निकं नीराजयेत् ॥ देवीपूजासंपूर्णतार्थं पुष्पांजालिं दत्त्वा जपं देव्यै
निवेदयेत् ॥ गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतं जपं ॥ प्रसीद मे महादेवि प्रसादात्तव सुंदरि ॥ इतिमंत्रेण देव्या द
क्षिणकरे साक्षतजलं दद्यात् ॥ संहारमुद्रया मूलमंत्रपूर्वकं सपरिवारां देवतां हृदि उद्वास्य ॥ देहे षडंगं ध्यात्वा
यथाशक्ति नवार्णवं जप्त्वा ॥ ततः पूर्वस्थापितं कलशं पुनः संपूज्य उत्तिष्ठमंत्रेण चालयेत् ॥ तेन कल
नो शोदकेन श्रेयःसंपादककोदकेन ब्राह्मणा यजमानमभिषिंचेयुः ॥ समुद्रज्येष्ठाः पावमानीः सुरास्त्वाम
भिषिंचंतु ॥ तदेवावभृथस्नानं ॥ अवशिष्टमुदकं वन्हेः पुरतो निनयेत् ॥ साक्षात्स्फालेन गृह्णीयात् ॥
जपहोमादिकं पञ्चतपोदानादिकं च यत् ॥ देव्याः समर्प्पेत सर्वं अग्निनाथ विसर्जयेत् ॥ यद्दागच्छेत
दागच्छतावत्तिष्ठ सुखेन तु ॥ अथ मंडपं सालंकारं सोपस्करं प्रतिमां च आचार्याय निवेदयेत् ॥ आ
चार्यत्वं गृहाणेमां प्रतिमां चं डिकामयां ॥ समर्चितां मया देवी मंडपं च तथैव च ॥ त्रिलोकनाथे देवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं सर्वभूतदयानिधे ॥ दानेनानेन संतुष्टा सुप्रीता वरदा भव ॥ ततो विप्रेभ्यो भूरिदानं दत्त्वा स्वयमलंकृत्य
शांतिपाठैर्नृत्यगीतवाद्यैस्तोरणाद्यैः स्वमालयं प्रविशेत् ॥ यथाशक्ति ब्राह्मणेभ्यो भोजनं
दत्त्वा मित्रैः सह स्वयमपि भुक्त्वा यथासुखं विहरेत् ॥ इति श्रीडामरादितंत्रसारे देवीमहोत्स
वे होमविधिर्नामाष्टमोऽवसरः ॥ अथ कालनियमः ॥ ॥ वसंते चैव पूर्वाह्ने मध्याह्ने ग्रीष्म
उच्यते ॥ अपराह्णे भवेद्वर्षा शिशिरश्चार्धरात्रिरुच्यते ॥ उषोहेमंतयोर्ज्ञेयः संध्यायां शिशिरस्त
था ॥ ग्रीष्मे उच्चाटनं कुर्यात् स्तंभनं प्रावृषे स्मृतं ॥ हेमंते मोहनं तद्वत् कुर्यात् शरदि शांतिकं ॥
शिशिरे मारणं ज्ञेयं वसंते वशिकर्म च ॥ अथ काम्यकुंडानि ॥ कृत्वा हस्तमितं कुंडं मेखलान
वसंयुतं ॥ चतुर्दिक्षु चतुर्योन्यः कर्तव्याः सुमनोहराः ॥ शांतिके चतुरस्रं हि वश्ये वर्तुलमे
व च ॥ आकृष्टौ वर्धचंद्रं तु त्रिकोणं मारणे मतं ॥ पद्माकारे कृते कुंडे श्रीकामस्य निरंतरं ॥ अ २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्पपत्रं तथास्तंभे वा पोरपि न संशयः ॥ मोहने द्वादशारं तु विद्वेषे षड्दलं भवेत् ॥ उच्चाटने सप्तपत्रं नवपत्रं तु मोह
ने ॥ एकादशदलं कुंडं कर्तव्यं रोगनाशने ॥ पंचपत्रं महासिद्धौ चतुःपत्रं सुखाप्तये ॥ संग्रामे धनुषाकारं
निर्वैरे द्विदलं भवेत् ॥ इति रव्याख्यानि कुंडानि तव भक्त्या महीपते ॥ तानि च समसूत्राणि कर्तव्यानि प
योक्तवत् ॥ सूत्राधिके सुहृद्द्वेषः सूत्रे हीने दरिद्रता ॥ वाग्रोधः कंठहीने स्यात् असिद्धिर्न्यूनखात
ने ॥ अधिके चासुरा रोगाः अमानोधिकमेखले ॥ व्याधयः संप्रवर्तंते हीनो वै चापदः स्मृताः ॥
उच्चाटः स्फुटिते कुंडे संकोचे वाप्यहानिरिति ॥ अथाग्नयः ॥ गार्हपत्यः स्तथा स्मार्तः क्रव्यादश्चा
ग्निहोत्रजः ॥ चतुर्विधः स्मृतो वह्निर्होतृभिः कार्यसाधकैः ॥ क्रव्यादः प्रेतजः प्रोक्तस्त्वाभिचारे प्र
शस्यते ॥ गार्हपत्यो गृहे यस्तु वैश्वदेवे निगद्यते ॥ अग्निहोत्रे तथा सोरव्ये कीर्तितोरणि संभवः ॥
स्मार्तोग्निः सर्वयज्ञेषु तस्य लक्षणमुच्यते ॥ उद्धृतः प्रोक्षितो मंत्रैः पात्रानीतः समुज्ज्वलः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं.वि.
२२

संस्कृतायांभुविस्थाप्य: स्मार्तोग्नि: परिकीर्तित: ।। उत्तराभिमुखोमंत्री शुभध्यानपरायण: ।। प्रो
क्तंहोमंप्रकुर्वीत यथाकामंयथाविधि ।। अथहोमद्रव्याणि ।। समिदाज्यतिलै: पुष्पै: शर्करान्ना
रिकेलकै: ।। पायसेनेक्षुखर्जूरै: कदलीफलतंदुलै: ।। पिप्पलपत्रैस्तथाबिल्वै: पद्मैर्वा शतप
त्रकै: ।। किंशुकैर्जातिबकुलै: पाटलै: सुकुमैस्तथा ।। श्रीपर्णीफलकैर्वापि तथादाडिमपुष्प
कै: ।। अन्यैश्चविविधैर्द्रव्यैर्यथालाभेनवापुन: ।। तदभावेसमित्सर्पिस्तिलानांहवनंभवेत् ।।
गुग्गुलै: करवीरैश्च जुहुयात्पुष्टिहेतवे ।। द्राक्षापक्वफलैर्नूतंकदलीजैर्जंबीफलोरिक्षुभि:
कांडैराम्रफलैरतीवरसिकै: सन्नारिकेलीफलै: कर्पूरागरुचंदनैर्मृगमदस्वेदस्फुरत्कुंकु
मैर्यो वीपिद्द्योक महीभुजोवरायाति श्रीमदुरोराहत्या ।। तिलफलपयोजै: संडुलैर्नारिकेलै: पुर
मधुमलयोद्भै: कुंकुमैर्मल्लिपुष्पै: ।। फलमिहपुरुषाणांभक्ष्यभोज्यान्नपानैर्विरतिकिलत २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यीर्मंत्रिया: सर्वकाम. नू ।। दूर्वांकुरैश्चारु कुशांकुरैश्चपलाशपुष्पैर्घृतसक्तुदुग्धैः ।। सुनाग
पत्रैः सघृतैश्च पूगैर्हुतं नराणां तनुते सदायुः ।। राजिका लवणसर्षपैर्हुतं द्वेषमारणविधौ च जारणे ।। भूमिपा
हितजनेषु योजयेत्स्थानि हानि क्षपितेषु कारयेत् ।। दुष्टवाङ्मुख सैन्यादिस्तंभने लवणान्वितां ।। हरि
द्रां होमयेन्मंत्री सघृतां विधिवन्नरः ।। अथ होमद्रव्याणां मानं ।। कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः
स्मृतं ।। उक्तानि पंचगव्यानि तत्समानि मनीषिभिः ।। दधिप्रसृतिमात्रं स्याद्दुग्धाजा मुष्टिप्रमाणतः ।। गु
डः पलार्धमानः स्याद्दृशर्करा च तथाविधा ।। ग्रासार्धं चरुमानं स्यात् पायसादि तथैव च ।। एकैकं पत्रपुष्पा
दि तथा पूगादिकं जयेत् ।। कदली फलनारिंग फलान्येकैकशो विदुः ।। मातुलिंगं चतुः खंडं पनसं दशधा
फलं ।। अष्टधा नारिकेलं स्याद्द्विधा बिल्वं कपित्थकं ।। फला दक्षमूर्ध्वमधोर्ध्वामध्यमाशाकिः
दंडाकारादंडमुद्रा ।। वामहस्तस्तथा तिर्यक्कृत्वा चैव प्रसार्य च ।। आकुंचितांगुलीं कुर्यात् चर्ममुद्राप्रकी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं॰वि॰ र्त्तिता ॥ वामस्य मध्यमाग्रं तु तर्जन्यग्रे वियोजयेत् ॥ अनामिकां कनिष्ठां च तस्यांगुष्ठेन पीडयेत् ॥ दर्शयेद्दक्षि
२४ णस्कंधे धनुर्मुद्रेयमीरिता ॥ वामहस्ततले दक्षमुष्टिं विन्यस्य गोपयेत् ॥ कुंभमुद्रा समाख्याता ग्रणवाम
तविस्तृता ॥ दक्षांगुष्ठे परांगुष्ठं क्षिप्त्वा हस्तद्वयेन तु ॥ सावकाशमेकमुष्टिं कुर्यात्सा भयमुद्रिका ॥ मध्य
मे कुटिले कृत्वा तर्जन्युपरि संस्थिते ॥ अनामिके मध्यगते तथैव हि कनिष्ठिके ॥ सर्वा एकत्र संयोज्याः
अंगुष्ठपरिपीडिताः ॥ एषास्यात्प्रथमामुद्रा यो निमुद्रेति संस्थिता ॥ होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च
सूकरी ॥ मुद्राहीनस्तु यो होमः स वै भवतु निःफलः ॥ सूकरीकरसंकोची हंसी मुक्तकनिष्ठिका ॥
मृगी कनिष्ठतर्जन्यो मुक्ता त्रयमुदाहृता ॥ पक्षशांतिककार्येषु मृगी हंसी प्रकीर्तिता ॥ अभिचा
रिककार्येषु सूकरी तु प्रकीर्तिता ॥ अथ जपमालालक्षणं ॥ अक्षमालां प्रवक्ष्यामि काम्यकर्मनियाशुभा ॥
मौक्तिकस्फाटिकी मिश्रा शांतिकर्मणि पोष्टिके ॥ प्रवालसंभवा या स्यात्तदंतसमुद्भवा ॥ साध्या २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रिके हलके शैर्ग्रथितं द्वेषकर्मणि ॥ अश्वदंतमणिमयां प्रोक्ताउच्चाटकर्मणि ४ मौणिभिः शंखसंभूतैर

क्षमाला श्रियेमता ॥ अक्षमाला प्रशस्तेयं शत्रुमारणकर्मणि ॥ + गेर्दभस्पर दोद्भूता महासुर रदोद्भवा ॥ +

धर्मकामार्थमोक्षार्थैजपेत्पद्माक्षमालया ॥ सर्वकर्मप्रसिध्यर्थंजपेद्रुद्राक्षमालया ॥ मंत्रप्रक्षतासिध्यै

स्फाटिकीवाथमौक्तिकी ॥ प्रवालमणिजामालाशस्तासारस्वतायवै ॥ पुत्रजीवाक्षसंभूता प्रशस्ता

सर्वकर्मसु ॥ पद्मसूत्रं भवेद्धांसैपौष्टिकेपितदिष्यते ॥ अनिष्टे क्षेम मुद्दिष्टेविद्वेषेनरकेशजं ॥ उच्चा

टनेथविष्टे यंवाजिवालसमुद्भवं ॥ नरस्नायुमयं सूत्रं वैरीमारणकर्मणि ॥ अन्यासामक्षमालानां

सूत्रंकार्पासतंतुजं ॥ अंगुल्याजपसंख्यानमेकमेवमुदाहृतं ॥ रेखयाष्टगुणंविंद्यात्पुत्रजीवैःशता

धिकं ॥ मंत्रप्रत्यक्षतासिध्यैकार्पासाशांतिकेशुभा ॥ स्फाटिकीमौक्तिकीत द्वत्प्रोतव्यासितसूत्र

के ॥ सर्वकर्मप्रसिध्यर्थंजपेद्रुद्राक्षमालया ॥ शुक्तिसौवर्णसंभूतैः मोक्षाद्यर्थस्यसाधने ॥ कुशग्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं० वि०
२५

ध्याच धर्मार्थी जपेदिंद्राश्च मालया ॥ त्रिंशदक्षकृता माला धनदा जपकर्मणि ॥ सप्तविंशतिसंख्याकैर
क्षैः पुष्टिप्रदा भवेत् ॥ पंचविंशतिसंख्याकैः कृता मुक्तिं प्रयच्छति ॥ अक्षैस्तु पंचदशभिराभिचार
फलप्रदा ॥ ब्रह्मग्रंथ्यन्विता कार्या मेरुयुक्ता महाफला ॥ मेरुं न लंघयेज्जाप्ये लंघिते निःफलो यतः ॥
अंगुष्ठं मोक्षदं विंद्यात्तर्जनी शत्रुनाशिनी ॥ मध्यमाद्य न्नदा शांतिं करोत्येषां ह्यनामिका ॥ कनि
ष्ठामरणे प्रोक्ता जपकर्मणि सर्वदा ॥ अंगुष्ठेन जपेज्जाप्यमन्यैरंगुलिभिः सह ॥ अंगुष्ठेन वि
नायच्च कृतं तदफलं पतः ॥ अथासनानि ॥ वेण्वासने दरिद्रं स्यात्पाषाणे व्याधिसंभवः ॥ भूमा
वेव महद्दुःखं दौर्भाग्यं दारुजासने ॥ तृणासने यशोहानिः पर्णे चित्तस्य विभ्रमः ॥ कृष्णाजिने ह्रद्धो
बोधो मोक्षश्री र्व्याघ्रचर्मणि ॥ उलपाव्याधिनाशः स्यात्कंबले दुःखमोचनं ॥ नीलासने भिचारः स्या
द्रक्तं ताम्रे प्रकीर्तितं ॥ कौशेयं पौष्टिकं कर्म शुक्ले त्वाकर्षणं भवेत् ॥ स्तंभनं च भवेत्पीले कृष्णे मोहनमीरितं ॥ २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वकार्याणि सिध्यंति चित्रकं बल्क संश्रयात् ॥ पद्मासनं न कुर्याच्चेत्तर्हि स्वास्तिकमार
भेत् ॥ मारणे महिषी-चर्म स्तंभने गज-चर्म च ॥ उच्चाटणे मेष-चर्म क्रोड-चर्म द्विषे मतं ॥ शांतिके ग
ज-चर्माणि गो-चर्माणि प्रकीर्तितं ॥ वशीकरणसिध्यर्थं सर्वसिध्यर्थमेव च ॥ व्याघ्र-चर्म
भवेत्पुंसामीप्सितं कर्म कुर्वतां ॥ आसने विषमे व्याधि-न्यूने बंधु धन क्षयः ॥ आसने अ
धिके कोपः स्याद्येव मासनमीरितं ॥ अथ वार नक्षत्र फलं ॥ ॥ शांतिकं सोमवारेण
आकर्षमंगलेन च ॥ बुधेन मरणं कार्यं गुरुणा शांतिपोष्टिकं ॥ स्तंभनं मंदवारेण सर्वक
र्माणि भानुना ॥ आकर्षणं कृत्तिकाभिर्भरण्यां मरणादिकं ॥ ज्येष्ठाभि स्तंभनं कुर्यात्
स्वात्योरुच्चाटनं भवेत् ॥ शततारा भिरुद्वेगः शुभैरन्यैश्च नश्यतां ॥ नक्षत्रवार विधिना
कुर्यान्मंत्र प्रयोगवित् ॥ स्तंभे पूर्वमुखं कुर्याद्विद्वेषे पावका[redacted]श्रितं ॥ मारणे याम्यदिग्भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेजारणे नैर्ऋता श्रितं ॥ धारुण्यां शांतिवश्यादौ उच्चाटे मारुते मुखं ॥ उत्तरे धर्मकार्यार्थं ई
शे मोक्षाय मंत्रवित् ॥ अथ पल्लवा: ॥ नमोंत: शांतिके पुष्टौ प्रणिपाते च कीर्तित: ॥ वश्याकर्षण हो
मेषु स्वाहांत: सिद्धिदायक: ॥ वषट् पल्लव संयुक्ता मंत्र: पुष्ट्यादि साधक: ॥ हुंकार पल्लवोपेतो मा
रणे प्राणनाशिना ॥ यंत्र भंजनकार्येषु सुभटानां विनाशने ॥ वौषडंतो महान्क रूप्यो ग्रहणामावि
नाशक: ॥ खंडनोच्चाटनो द्वेषे मंत्र: षट् पल्लवान्वित: ॥ ॥ इति श्री डामरादितंत्र सा[...]रे श्रीले
श्वरसूरिविरचिते देवी महोत्सवे काल नियमादिनाना विधिर्नाम नवमोवसर: ॥ ॥
शके १८१० फाल्गुन कृष्ण प्रतिपद्यां श्री क्षेत्र कवीरि श्री संनिधौ पांडुरंगात्मज गोविंदे
नालिखितं ॥ शुभं भवतु ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=07.08.20 15:35
,TRANSFERRED=2020/08/07 at 15:42:30
,PAGES=53
,TYPE=STD
,NAME=S0003445
,Book Name=M-2637-DURGASHAPTSHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE52=00000052.TIF
,FILE53=00000053.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection